
॥ श्रीः ॥

मन्त्रतत्त्वप्रकाशिका ।

श्रीपद्माचार्यविरचिता त्रयोविंशतिपद्यात्मिका ।

मिश्रोपाह्वगयादत्तशर्म्मविरचितव्याख्यया
समलङ्कृता ।

सेयं

चैनपुराख्यग्रामनिवासिना

श्री बाबू श्रीकण्ठप्रसादनारायण सिंहेन

काश्यां

चन्द्रप्रभायन्त्रालये मुद्रापयित्वा

प्रकाशिता ।

वैक्रमीय संवत् १९६१ ।

॥ श्रीगणेशाय नमः ॥

अथ मन्त्रतत्त्वप्रकाशिका ।

नमो रुद्राय देवाय स्वतन्त्रायाखिलात्मने । प्रधान-पुरुषेशाय जगत्सर्गादिहेतवे ॥ १ ॥ विश्वनाथपदाम्भोजनखच-न्द्रमरीचयः । संचारिण्योऽस्तमस्यन्धे मम सन्त्ववलम्बनम् ॥ २ ॥ शरदिन्दुसुंदररुचिश्चेतसि सा मे गिरां देवी । अपहृत्य तमः स-न्ततमर्थानखिलान् प्रकाशयतु ॥ ३ ॥ देवेन्द्रमौलिमन्दारमक-रन्दकणारुणाः । विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ॥ ४ ॥ विश्वेशं सच्चिदानन्दं परब्रह्मसदाशिवम् । नमस्कृत्य हरं साम्बं कुर्वे भाष्यप्रकाशिकाम् ॥ ५ ॥ नित्यं सान्द्रपयोद-सौभगतनुं सौदामिनीवाससं फुल्लत्पङ्कजलोचनं श्रुति शिरो जैमीयजमानं परम् । वंशीवादनतत्परं व्रजवधूनेत्रा-ब्जजातोत्सवं वृन्दारण्यगतं सुधांशुवदनं श्रीनन्दसूनुं भजे ॥ ६ ॥ ध्यायन् मन्त्रार्थतत्त्वं यो जपेन्मन्त्रमनन्यधीः । चिन्तयन् मन्त्रदेवं च लभेताविकलं फलम् ॥ ७ ॥ तस्मा-च्छ्रीमन्त्रराजस्य प्रमाणैर्बहुभिर्युतम् । अर्थान् बहुविधान् पूर्वैर्दृष्टान् यथामति ॥८॥ श्रीश्रीकण्ठप्रसादस्य शिवपादा-ब्जसेविनः । शिवैकायत्तचित्तस्य विनोदाय तदाज्ञया ॥ ९ ॥ पातञ्जलमहाभाष्यपरिशीलनतत्परः । मिश्रोपाह्वगयाद-त्तशर्मा गुरुपादाम्बुजम् ॥ १० ॥ ध्यायन् ध्यायन् श्रुति-

शिरो निर्णितार्थविचारवान् । भवगत्पूज्यपादास्य सिद्धान्तस्यानुसारतः॥११॥ श्रीपद्माचार्य्यरचितत्रयोविंशतिपद्यकैः । दर्शितोऽर्थोतिगम्भीरस्तस्मात्सुगममुच्यते ॥ १२ ॥

त्यागो हि नमसो वाच्य आनन्दः प्रकृतेस्तथा । फलं प्रत्ययवाच्यं स्यात् त्याज्यं तत्र फलादिकम्॥१॥

मन्त्रार्थं व्याचष्टे। त्यागोहीति त्यागोनाम स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनम् । हि शब्दः प्रसिद्धिं द्योतयति । नमसः नमःशब्दस्य वाच्यश्शक्तिविषयोऽर्थस्त्यागरूपः प्रसिद्ध इति यावत् । इन्द्रादिभ्यो यज्ञीयभागदानसमये इन्द्राय नम इत्यादिप्रयोगदर्शनान्नमश्शब्दवाच्यः वाच्योऽर्थस्त्यागरूपः प्रसिद्ध इति भावः। प्रकृतेर्वाच्योऽर्थः आनन्दो ब्रह्मरूपः चतुर्थी विभक्तिरूपप्रत्ययप्रकृतिः प्रत्ययविधानावधिरूपाशिवश रूपः तदर्थ आनन्दरूपः परम्ब्रह्मसाम्बशिवः 'आनन्दो ब्रह्मेति व्यजानात् आनन्दाद्ध्येव खल्विमानि भूतानि' इत्यादि श्रुतिरूपः शिवमद्वैतं तुरीयं मन्यत इत्यादि श्रुतिभ्यश्च एवं चतुर्थीविभक्तिरूपप्रत्ययप्रकृतेश्शिवशब्दस्य वाच्यमर्थमुक्त्वा ततोविहितायाश्चतुर्थीविभक्तेरर्थमाह । फलमित्यादि । उद्देश्यश्चतुर्थ्यर्थः । तस्य द्रव्यत्यागरूपे विधेयेऽन्वयात्फलत्वमेव पर्य्यवस्यति तद्धनमाह । फलं प्रत्ययावाच्यमिति ।

शिवस्योद्देश्यत्वं द्रव्यकर्मकत्यागस्य विधेयत्वम् । तथा च शिवोद्देश्यकत्यागविषयीद्रव्यमितिबोधः फलितः । प्रत्ययेति चतुर्थ्येकवचनकेप्रत्ययेत्यर्थः । त्यजधातोस्सकर्म्मकत्वात्कर्मजिज्ञासायामाह त्याज्यमिति । बिल्वपत्रफलपुष्पादिदेयवस्तु त्याज्यमित्यर्थः ॥ १ ॥.

त्यजामीदमिदं सर्वं चतुर्णामिह सिद्धये । अथवा नमसो वाच्यः प्रणामो दैन्यलब्धये ॥ २ ॥

पदार्थानभिधायवाक्यार्थमाह । त्यजामीति । ददामि उत्सृजामीति यावत् । इदमिदमिति न वीप्सायां द्विवचनं ग्रामोग्रामो रमणीय इत्यादाविव व्याप्यव्यापकभावसम्बन्धस्याप्रतीतेः किन्तु देयद्रव्यस्य प्राप्तिस्वीकाररूपाभिप्रायेणैच्छिकःपुनः पुनः प्रयोगः । अनावृत्तिः शब्दा दनावृत्तिः । देयद्रव्याणां स्मृतानां केषांचिदस्मृतानां च कृत्स्नरूपाभिप्रायेणाह । सर्वमिति यावद्देयं यथाशक्ति स्मृतमस्मृतं वा तत्सर्वमुत्सृजामीति तात्पर्यार्थः । परममूले फलस्यानुक्तावपि विश्वजिता यजेतेत्यत्र यथा फलस्यानुक्तावपि यागसार्थक्याय स्वर्गकाम इति कल्प्यते तथेहार्थादिचतुष्टयकाम इति कल्प्यते । यागस्थले स्वर्गमात्रप्रकल्पनेपि परमेश्वरचरणारविन्दपूजायाः 'ये यथा मां प्रपद्यन्त' इत्यादि वाक्यसकल-

फलस्याधिकारिविशेषेषु प्रतिपाद्यतया ऽर्थधर्मकाममोक्षाणां श्रीपादारविन्दप्रसादेन सुलभत्वादाह चतुर्णामिति । इहेति जीवदशायामित्यर्थः । ननु बाह्यार्चादिनैव वर्गचतुष्टयसिद्धौ ध्यानज्ञानादिशास्त्रवैयर्थ्यापत्त्या न त्यागार्थकत्वं नमश्शब्दस्याधिकारिविशेषंप्रत्याह । अथवेति । 'त्यागे नमस्कृतौ चार्थे ध्याने माने तथा स्मृतौ । नमश्शब्दं प्रयुञ्जीत भावे भ्रंशे विशेषत' इति निघण्डुवचनान्नमश्शब्दस्य नमस्कारार्थत्वं प्रसिद्धम् । लोकेपि नमस्कारार्थत्वन्नमश्शब्दस्य प्रसिद्धतरम् नमस्कारस्य प्रणामस्य च स्वनिष्ठापकृष्टत्वनिरूपितप्रणम्यनिष्ठोत्कृष्टत्वबोधजनकोऽव्यापारः शिरोनम्रतापादननमश्शब्दप्रयोगादिरूपो व्यापारः । तथा च प्रणम्य साम्बशिवपरब्रह्मणि ईश्वरत्वं स्वास्मिन् दैन्यं पर्य्यवस्यति । विश्वजिन्न्यायेन प्रमाणफलमाह । दैन्यमिति । स्वस्मिन् दैन्यलाभायेत्यर्थः ॥२॥

दैन्यं सेवा तथा ज्ञप्तिः सिद्धिरस्य वस्तुनः । नमामि देवदेवेशं सकामोऽकाम एव वा ॥ ३ ॥

तत्र दैन्यपदार्थमाह दैन्येति । त्वमीश्वरो ऽहं सेवक इति पर्य्यवसानाद्दैन्यं सेवेत्युक्तम् । तत्र सेवाशब्देन न बाह्यपूजामात्रं किन्तूत्तमाधिकारिणो ज्ञाननिष्ठस्य मोक्षकामस्य सेवाज्ञप्तिः । अत एव निघण्टौ ज्ञाने माने इत्युक्तम् ।

ज्ञप्तिर्ज्ञानं तच्च ध्यानरूपम् । ध्यानं विजातीयप्रत्ययानन्त-रितसजातीयप्रत्ययप्रवाहः । एवं स्थिते ईदृशस्याधिकारिविशे-षस्यसकलाभिमतानभिमतसिद्धयअणिमादिसिद्धयो वा ऽना-यासेनैव लभन्त इति दर्शयितुमाह । सिद्धिस्सर्व-स्येति । सङ्कल्पमात्रेणैव सकलसिद्धिलाभात्तादृशसेवा-रूपदैन्यलाभायेति यावत् । अस्मिन्नर्थे वाक्यार्थमाह । नमा-मीति नमनं ध्यानं ज्ञानं वा अधिकारिविशेषस्यानुक्त-त्वेपि सामर्थ्यात्सर्वमते इदं विशेषणं बोध्यम् । सकाम इत्यादि । प्रायेण सकामत्वमेव भवतीति प्रथमं तस्य प्रयोगः । शिवशब्दार्थकुक्षिप्रविष्टत्वाद्देवदेवशनित्युक्तिः विनिगमनाविरहाद्विविधोप्यधिकारी निर्दिश्यते । तत्र यस्सकामः स स्वाभिमतकामाय श्रीपादारविन्दं प्रणमति । यस्त्वकामः स केवलज्ञानलाभाय प्रणयति ॥ ३ ॥

नञानिषिध्यते भावो विकृतिर्जग-गदात्मनः । प्रसनं शिवदेवेश नेह-नानास्ति शब्दतः ॥ ४ ॥

परमगुरावर्पितकर्म्मभिश्चित्तशुद्धौ श्रीमत्पादारविन्दो-पासनया चित्तैकाग्र्यसंपत्तौ च ज्ञानेऽधिकारी भवतीति तं प्रति विवर्त्तवादादिना शुद्धस्वरूपमुपदिशति । नञेति । परिणामार्थप्रसधातोर्प्रसनमित्यर्थे प्र इति सम्पदादित्वाद्भावे

क्विप् । नमः परिणामो यस्य स नमास्तत्सम्बुद्धौ हे नम इति नैषधेत्यादाविव निरनुबन्धो न शब्द इति न नलोपः । शिवेत्यपि सम्बुद्ध्यन्तं निरुपपदभावशब्दो ब्रह्मणि विकृतिशब्दः षड्विकारत्वात् ब्रह्मणः विकृतिर्भावविकृतिरिति षष्ठीतत्पुरुषः । आत्मन इत्यत्र सापेक्षत्वेपि गमकत्वात्समासः । आत्मन इत्यस्य ब्रह्मण इति समानाधिकरणं विशेषणं भावाभिन्नस्यात्मन इत्यर्थः । का विकृतिरित्याशङ्कायामाह । जगदिति । जगद्रूपो विकारो ब्रह्मणो नास्तीत्यर्थः । भवन्तं च इति । शिवशब्दार्थमाह । देवेशेति आत्मार्थे प्रमाणमाह । नेहनानेति ॥ ४ ॥

अयेति गमयेत्यर्थे तस्मात्त्वदुदोऽस्मि नित्यशः । प्रणामो देहगेहादेरभिमानस्य नाशनम् ॥ ५ ॥

चतुर्थ्यर्थमाह । अयेति । हे नम हे निर्विकार हे शिव त्वमयं स्वस्वरूपं प्रापयेत्यर्थः । अयगताविस्यस्य मध्यमपुरुषैकवचनान्तम् । यद्यप्यात्मनेपदी धातुरयं तथाप्यनुदात्तत्वलक्षणमात्मनेपदमनित्यरीत्या साधु आर्षं वा परस्मैप[illegible] अयेति । तस्मात्तव विकाराभावे प्रवेशस्याभावादहं शुद्धोऽस्मीति फलितम् । नित्यश इत्यनेन सर्वदायकरूपत्वं नतु संस्कार्यत्वादिरूपत्वेति ध्वनितम् । पाशुपतमतेनाह ।

प्रणाम इति । तस्मादुक्तेन प्रणामशब्दार्थेन सेवाध्यानज्ञ-
प्त्यादिरूपेण यत्फलितं तदुपसंहरति । सेवाध्यानादिभिस्स्व-
रूपप्राप्तिप्रार्थनया परमानन्दपरमह्लासाम्बशिवस्वरूपप्राप्ति-
विघया अविद्यानाशादेव भवतीति देहगेहाद्यभिमानरूपा
अविद्यानाश एव प्रणामशब्दार्थः फलितस्तद्दर्शयितुं प्रणामो
देहगेहादेरित्यादि दर्शितम् ॥ ५ ॥

शिवो ब्रह्मादिरूपस्याच्छक्तिभि-
स्तिसृभिस्सह । अथवा तुर्य्यमेव-
स्यान्निर्गुणं ब्रह्म तत्परम् ॥ ६ ॥

तन्मते एव शिवशब्दार्थमाह । शिव इति । शिवस्य
चिद्रूपा नारायणाख्या शक्तिस्तदीया ब्रह्माख्या शक्तिस्ति-
सृशक्तयोपि त्रयाणां स्वाभिन्नाशक्तिः । [illegible]कशक्ति-
मतोरभेदात् । ज्ञानपक्षे शिवशब्दार्थमाह । अथवेति ।
तुर्य्यमेवेति । तूर्य्यं चतुर्थं शिवमद्वैतं तुरीयं मन्यन्ते इत्यादि
श्रुतिप्रतिपादितं स्थूललिङ्गकारणरूपशरीरत्रयोपहितचैतन्य-
विश्वादिरूपत्रितयादन्यच्छुद्धं सच्चिदानन्दरूपशिवाख्यं
निर्गुणं निर्विकारं ब्रह्म निर्गुणं निष्क्रियं शान्तं निर्विकल्पं
[illegible]मित्यादि श्रुत्यभिहितं शिवशब्दवाच्यमप्यर्थः ।
परमिति । तत्त्वमसीत्यादिमहावाक्यतत्पदलक्ष्यं ब्रह्म
मयानिपाद्यं यत्रेत्यर्थः ॥ ६ ॥

नमसे नमने शक्तिर्नमनं ध्यान-मेव च । चतुर्थ्यां तादात्म्यसम्बधः कथ्यते प्रत्यगात्मनोः । ७ ॥

निर्गुणपक्षे नमश्शब्दार्थमाह नमस इति । ध्यानं निदिध्यासनम् । पूर्वं देहाद्यभिमान...वान्यशब्देन सगुणध्यानमुक्तमिदानीं तु निर्गुणस्य ध्यानं निदिध्यासनम् । पूर्वं देहाद्यभिमानाभावः प्रणामस्तत्फलं सगुणध्यानमिदानीं नमश्शब्दार्थे ध्यानं निदिध्यासनं शासिशब्देनोक्तमिदानीं ज्ञानप्रकारमाह चतुर्थ्येति । जीवब्रह्मणोस्तादात्म्यसम्बन्धोऽभेदः प्रत्यङ्जीव आत्मा ईश्वरः ॥ ७ ॥

अहं शिवश्शिवोहं च मन्ये वेदान्तनिष्ठया । इत्येव नम इत्युक्तं वेदैः शास्त्रैश्च सर्वशः ॥ ८ ॥

अनयोरभेदस्तत्फलमाह । अहमिति । जीवपर-मात्मनोरभेदबुद्धिप्राप्त्या प्रणामन्तु साधकस्य यादृशोऽनु-उल्लसति तमनुभवं प्रदर्शयति । अहं शिव इति ... ब्रह्मानन्दानुभाव इत्युच्यते । प्रत्यगात्मा जीवः पूर्वमनु स तु शिवाद्भिन्नः कश्चित्पदार्थः । यश्च शिवः पर...

श्वरो जीवादतिरिक्तः पूर्वमनुभूतः सोपि प्रत्यगात्मा जीव एव न तु ततो भिन्नः कश्चित्पदार्थः । एवं तादात्म्यफल उपदर्शिते स्वस्य कृतार्थताभिव्यज्यते । एवमेतदर्थमेव वेदान्तनिष्ठवेदान्तजन्यज्ञानश्रद्धया नमश्शब्दार्थ उक्तः ॥८॥

अथवा दा[illegible] एवाहमहं दास इती-रणम् । इत[illegible] नम इत्युक्तं वेदैः शा-स्त्रैश्च सर्वशः ॥ ९ ॥

उपासनापक्षे नमश्शब्दार्थो लोके यः प्रसिद्धस्तेन न-मस्कर्त्ता अपकृष्टः नमस्कार्य्यं उत्कृष्टस्तत्फलितवाच्यार्थ-माह । अहं दास इति नमस्कारेणात्मनि दासत्वं फलितं भवतीतिभावः ॥ ९ ॥

अथवेदमिदं सर्वं[illegible]ामि पर-मात्मने । अर्थं धर्म्मं च कामं च वाञ्छँश्च जगदीश्वरम् ॥ १० ॥

ज्ञानपक्षे केवलज्ञान्यभिप्रायेण पूर्वमुक्तमिदानीं जीव-[illegible]यभिप्रायेण सर्वैषणात्यागपूर्वब्रह्मसाक्षात्कारं मनसि [illegible]निधाय नमश्शब्दार्थमाह । अथवेदमिति । त्यजामीति । इदं सर्वं पत्रपुष्पफलादिरूपं देयं वस्तु त्यजामीत्याशयेनाह ।

सर्वमिति । विश्वजिन्न्यायेनाद्गुणफलमाह । परेति परम् मोक्षस्तस्याप्तये प्राप्तये इत्यर्थः । सर्वशब्दार्थमाह । अर्थमिति । अर्थं धर्म्मं च कामं च वाञ्छनाहं त्यजनीत्यर्थः । जगदीश्वरं शिवम्प्राप्ति परमप्राप्तिशब्दार्थं व्याचष्टे वाञ्छश्चेति॥१०॥

एतन्मन्त्रार्थतत्त्वज्ञैर्वेदवेदान्ततत्परैः । निर्णीतं तत्त्वगर्भं यद्विज्ञेयं मुक्तिलब्धये ॥ ११ ॥

दशभिः पद्यैरुक्तं यत्तज्ज्ञातव्यमेकादशकेनत्याह । उपासनापक्षे सेव्यसेवकभाव इत्युक्तं तत्स्पष्टयति एतदिति । मन्त्रार्थतत्त्वं जानन्ति ते मन्त्रार्थतत्त्वज्ञास्तैर्वेदवेदान्ततत्परैर्निर्णीतं यत्तत्कीदृशं तत्त्वगर्भं तत्त्वं ब्रह्मतत्त्वं गर्भेऽन्तर्यस्य ब्रह्मतत्त्वम[illegible] विज्ञेयं विशेषतो ज्ञातव्यम् तत्फलमाह मुक्तिल[illegible] मुक्तिलाभायेत्यर्थः एतेनैतन्मन्त्रज्ञाने मुक्तिलाभो भवतीति सूचितम् । यथा ब्रह्मज्ञानेन मोक्षस्तथा एतन्मन्त्रार्थज्ञानेनेत्यर्थः ॥ ११ ॥

अथवा मुक्तिलाभार्थं ज्ञेयं तत्त्वं विवेकतः । [illegible]न्नं बुद्ध्वा हृदा देवं मन्त्रेणेशं जद्गुरुम् ॥ १२ ॥

द्वादशेकेन सेव्यसेवकभावः प्रसिद्धः तदेवं सकामाकामभेदेन द्विविधमुमुक्षुजनानां मोक्षोपायं प्रदर्शयेदानीं सांसारिकविषयभोगकामानामीश्वरो भिन्न इति जीवश्च भिन्न इति भेदज्ञानवतां केवलमन्त्रजपादेव मम श्रेयो भविष्यतीति निश्चयवतां सेव्यसेवकभावेन सकलभोग्यलाभो भविष्यतीत्यभिप्रा[illegible] । अथवेति । भुक्तीति । सांसारिकधनपुत्रादिरूपभो[illegible]कामार्थमित्यर्थः शास्त्रजन्यज्ञानात् । शिव एव सकलफलप्रद इति निश्चयज्ञानात् तत्त्वम् । शिवतत्त्वम् । ध्येयं ध्यातव्यम् । केन रूपेण ध्यातव्यमित्याकाङ्क्षायामाह मन्त्रेणेशमिति । केवलमन्त्रजपेनैव । ईशमिति । स्वस्माद्भिन्नमतिरिक्तं ईशं ईश्वरं हृदा मनसा बुद्ध्या निश्चयेन ज्ञात्वा जगद्गुरुं जगतां गुरुं सर्वेभ्यः फलदातारं [illegible]रूपमेव ध्यानं श्रेयःसाधकमिति भावः ॥ १२ ॥

नमे रचि नमः [illegible]न्तास्या-
ज्जगदीश्वरे । तस्माद्दासोहमित्येवं
मत्वा मां प्रापयात्मनि ॥ १३ ॥

द्वादशेकेन सेव्यसेवकभावः कथं बुध्यते इति जिज्ञा[illegible]ं नमश्शब्दस्यार्थान्तरमाह । नमेरिति ‘णमप्रह्वशब्दे’ पचादित्वादच् प्रत्ययः । शिवशब्दार्थः पूर्वोक्त एवात्रापि ज्ञातव्य इत्याह । जगदीश्वर इति फलितं । वा-

मन्त्रार्थमाह । हे शिव त्वयि जगदीश्वरे नमः । नैताऽस्मत-
स्तत्स्वरूपे मामव मापय इति भावः । आत्मानि(?) स्वस्मिन् शिव
ईश्वरदासजनानां भेदबुद्ध्या जपानुष्ठाननिष्ठानामपि चिर-
कालं जपानुष्ठानप्रभावादन्ततो ज्ञाननिष्ठा प्राप्स्यन्तीत्य-
तीतिमोक्षोऽपि पश्चात्संस्यतीत्यभि[illegible] नमःशब्दस्या-
र्थान्तरमाह नमेरिति ॥ १३ ॥

अस्मिञ्छेते ज[illegible] तन्मयं
शब्दगामि यत् । तद्वानाच्छिव
इत्याहुः कारणं ब्रह्मतत्पराः ॥१४॥

उपासनापक्षे शिवो ब्रह्मादिरूप इत्यनेन कार्यब्रह्म-
परत्वं शिवशब्द[illegible]त्विष्टम् । ज्ञानपक्षे ऽथवा तूर्यमेव[illegible]न
निर्गुण[illegible]य निरुक्त्याभिधत्ते । अस्मिन्
इति चतुर्दशकेन अस्मि[illegible]न्निति शेते अस्मिन् जगदिति शिः
जगल्लयाधिकरणम् । शीङ्धातोः क्विप् 'ह्रस्वो नपुंसके' इति ।
ह्रस्वः । सन्निपातपरिभाषया ह्रस्वस्य पितीति न तुक् ।
शिशब्देन प्रधानमकृत्यपरपर्यायभूतन्निर्दिष्टम् । प्रलयसमये
प्रधान एव जगल्लयात् शिं नामप्रधानं वाति स्वस्मिन्
विलापयतीति शिवः । वाधातोर्विलापनमर्थः । [illegible]
कार्थत्वात् 'आतो ऽनुपसर्गे' इति कप्रत्ययः । तद्वानादिति
तस्य प्रधानस्य वानात्स्वस्मिन् विलयीकरणात् शब्दगामि

शब्दब्रह्मस्फोटरूपं कारणं ब्रह्म शिवशब्देनोक्तम् । कीदृशं तत् तत्त्वमसीत्यादिमहावाक्यान्तर्गततत्पदलक्ष्यं शुद्धं ब्रह्मपरं परमंप्रतिपाद्यं येषां ते तत्पराः ब्रह्मसाक्षात्कारवन्तः ॥ १४ ॥

नमो यस्यास्ति लक्ष्मीश सोऽहं देवो न सं[illegible] तस्मान्मे प्रापयेहैव लक्ष्मीं वि[illegible] सनातनीम् ॥ १५ ॥

नमश्शब्दस्यार्थान्तरमाह नमेति । नमा लक्ष्मीर्विद्यारूपा यस्यास्ति सोऽहं नमः । अतो मां विद्यामय प्रापय । विद्ययाऽविद्यानाशात्स्वरूपं प्रापयेत्यर्थः । तद्धनयन्नाह । लक्ष्मीं [illegible]द्यां सनातनीमिति । नमऽविद्या यस्यास्ति स नमः । अहंनमः नि[illegible]यः शास्त्रदृष्ट्या जीवस्य व[illegible] ब्रह्मस्वरूपतया [illegible]द्यमानाविद्यस्तथाप्यहमज्ञ [illegible] [illegible]न्विद्या-[illegible] [illegible]शिवेति सम्बुद्ध्यन्तस्य लक्ष्मीश इति विवरणम् । लक्ष्यते बुध्य[illegible] परमात्मा सा लक्ष्मीः विद्या ' ईशानः सर्वविद्यानामि[illegible]दि श्रुतिभिः शिवस्य सर्वविद्याकर्तृत्वेन नियन्तृत्वादीशत्वमिति । हेलक्ष्मीश अविद्याया मयि अभावेपि स्वानुभवप्रासायाः हेविद्येश शास्त्रदृष्ट्या अवि-[illegible]करणे न मे सामर्थ्यमिति विद्यांसनातनीं प्रापय इहैवेत्यनेन विद्याया दृष्टफलकत्वं सूचितम् । लक्ष्मीमित्यस्य विद्यामिति विवरणं सनातनीमित्यनेन विद्याया नित्यत्वं

सूचितम् । सोऽहं देवो न संशय इत्याकारां संशयविपर्य्ययादिशून्यामित्यर्थः ॥ १५ ॥

यस्मादानन्दरूपस्त्वं देवैर्वेदैर्निगद्यसे । तस्मान्मे देहि योगीश भद्रं ज्ञानं सुभावनम् ॥ [illegible] ॥

पूर्वोक्तमर्थं फलितमुपसंहरति [illegible] स्मादिति । शिवशब्दार्थमाह । आनन्देति । देवैर्विद्वद्भिर्वेदैर्ऋग्वेदादिभिर्निगद्यसे उपदिश्यसे त्वमानन्दरूपः अहन्तु त्वद्भूत्या दुःखीति मे मह्यं तस्मादानन्दस्वरूपत्वाद्देहि हे योगीश योगी योगोनिजानन्दानुभवो अस्ति येषां ते योगिनः सनकादयस्तेषामीश- नित्यानन्दप्रद मह्यं निजानन्दस्वरूपत्वाद्देहि योगीयोगोनि[illegible] जानन्दस्य स्व[illegible] ष्ठु भाव्यते स्वरूपं सच्चिदा[illegible] लक्षणं [illegible] वैधं तत्सुभावनं तादृश[illegible] देहीति । तस्मात् [illegible] येन पञ्चदशषोडशात्मके[illegible] नन्दरूप शिव यतो अहं विद्यारहितः अविद्या[illegible] अतः मह्यं विद्यादानेनाविद्यानाशं कृत्वा सोऽहं दे[illegible]ति तत्त्वसाक्षात्काररूपं ज्ञानं मेभावयेति ध्वनितम् [illegible] ॥

यस्मान्नेति नेतीति नअर्थं मासि वेदजम् । तस्मान्नमोसि भ[illegible] यतोजातो नमो नमः ॥ १७ ।

नमश्शब्दस्यार्थान्तरम् । शिवायेति शब्दस्यार्थान्तरमाह । यस्मान्नेतीति । नेतिनेतीत्याकारकवेदजं वेदोद्भवं नञर्थम् । आकाशादिप्रपञ्चस्याभावम् । आकाशादिप्रपञ्चं भासि त्वम् सच्चिदानन्दस्वरूपे अध्यस्य शुक्तौ रजतमिवारोपयसि माया-तोऽरिहध्यासोऽर्थः [illegible] प्रामाण्यात्त्वं नमोऽसि । आका-शादिप्रपञ्चतदभा[illegible]स्वरूपोऽसीत्यर्थः । अतो मे मह्यं भद्रं ज्ञानं देहीति [illegible]तः यस्माद्धेतोस्त्वं नमः भ्रमज्ञः अहं अनमो जात[illegible] अनम इत्यकारच्छेद एकत्र नमो भ्रमज्ञः न नमः अनमः भ्रान्तः अतो भृत्यं भ्रान्तं मां भ्रमनाशेन भ्रमज्ञं कुरु इति फलितोऽर्थः । अनेन सप्तदशश्लोकेन नमश्श-ब्दस्यार्थः नमासीति नम इति व्युत्पत्या भ्रमज्ञस्त्वं नमः । अहं तु अनमोजातः भ्रांतो जातः । अतो भ्रमनाशेन [illegible] मामपि कुरु इति तात्पर्य्यं [illegible] ॥१७॥

[illegible]वं शिव यथा [illegible] शिवायेति
निग[illegible] शिवाय मे तथा प्राप्त्या
शिवायङ्कुरु सर्वदा ॥ १८ ॥

[illegible]शिवाय शब्दस्यार्थमाह । एकश्शिवशब्दो नित्य-[illegible]वा । द्वितीयस्सच्चिदानन्दवाची । आप्राप्तइत्याकारच्छेदः। शिवमायातः सच्चिदानन्दस्वस्वरूपं नित्यं सदाप्राप्तः सदानु-

भविता असि त्वम् । अतो मे शिवाय इति शब्देन निगमैः उपदिश्यसे । शिवेति सम्बुद्ध्यन्तम् । हे सदा सच्चिदानन्दस्वरूपनिमग्न शिवाय मे मम शिवायं सच्चिदानन्दस्वरूपं विद्यया माप्त्या लभेत शिवायं सच्चिदानन्दस्वरूपानुभवितारं कुरु सर्वदा सर्वस्मिन् [illegible] । अनेनाष्टादशैकोनविंशतिश्लोकाभ्यां त्वद्रूप[illegible] यथा त्वं सच्चिदानन्दरूपः शिवायः तथाऽहम[illegible]तो भवेयम् । यथा त्वं महाविद्यावान् शिवायस्तथाऽहमपि ब्रह्मविद्यावान् शिवायो भवेयमिति द्वेधा तात्पर्यं भवितव्य ॥ १८ ॥

शिवां याति महाभद्र नमोऽस्म्या-
यया ध्रुवम् । ततो नमाय मह्यं [illegible]
शिवा[illegible]र्वथा ॥ १९ ॥

शिवाय शब्दस्य नमश्शब्दस्य चार्थान्तर[illegible]नीं यात इति शिवां सच्चिद्रूपां ब्रह्मविद्यां [illegible] शक्तिं यातः प्राप्त इति शिवायः । आङ्पूर्वहितन्[illegible]वाशब्दे उपपदे याधातोः कप्रत्ययः । महाभद्रेति । शिवाय शब्दार्थविवरणम् । यतश्चिद्रूपां शक्तिं प्राप्तः अतः हे महाभद्र हे महामङ्गलस्वरूप नमोऽहमिति । नमायेतिनमा [illegible] स नमः अविद्यावान् मायया अविद्यया ध्रुवम् । ततस्तस्मै नमाय मह्यं अविद्यावते मः परिणामं अविद्यया भासमानं

विद्यया निराकृत्य शिवायं कुरु कृपावारिह दानार्थः । चिद्रूपशक्तिमद्रूपस्य अविद्यया तिरोहितं विद्यया देहि प्रादुर्भावयेत्यर्थः । म इत्यत्र निराकृत्येतिशेषः । अस्मिन् पक्षे परिणामवादी सान्तं म इति पदम् आर्थिकमागन्तुकं ननु मन्त्रघटकम् ॥ १९

शिवमे[illegible] ज्ञप्त्या शिवायस्त्वं प्रपठ्यसे । न ते माया यतो ज्ञप्त्या नमो वेदैः प्रपठ्यसे ॥ २० ॥

नमश्शब्दस्य शिवायशब्दस्य चार्थान्तरमाह । शिवमे-[illegible] शिवमिति कर्मणि उपपदे इण्धातोर्ज्ञानार्थात्कर्म-[illegible] प्रत्ययः अचोञ्णितीति [illegible] प्रत्ययः यतः [illegible] विद्यया शिवं सच्चिदा[illegible] स्वरूपं एवि जानासि [illegible] वेदैश्शिवायेति पदेन प्रपठ्यसे उपदिश्यसे । नमः शब्दार्थम[illegible] इति नमा अविद्या यस्य स नमः अविद्यारहितः ते तव माया अविद्या न नास्ति कुतः ज्ञप्त्याविद्यया निराकृतत्वादितिशेषः । अतो वेदैस्त्वं नमः निरविद्य[illegible] इति प्रपठ्यसे । अनेन विंशतितमश्लोकेन त्वं [illegible]था अविद्यालेशरहितस्तथा नित्यज्ञानेन स्वरूपज्ञानवानितिध्वनितम् ॥ २० ॥

नमो हं च शिवायोहं नमो मह्यं नमो नमः । नमो नमाय शुद्धाय मङ्गलाय नमो नमः ॥ २१ ॥

परमगुरावर्पितकर्मभि[illegible]मत्पादारविन्दोपासनया चित्तैकाग्र्यस्य स[illegible]परब्रह्मसाम्बशिवरूपया शमदमादिसाधनसम्प[illegible]श्रोत्रीयगुरुप्रसदनादिना महावाक्यजनिताऽखण्डसच्चिदानन्दपरब्रह्मसाम्बशिवाभिन्नशारीरकजिज्ञासुस्वरूपसाक्षात्कारसंपत्तौ स्वानुभवानन्दसाम्बशिवाभिन्नं गुरुम्प्रति परीक्षायै ब्रह्मानन्दसमुच्छ्वासमुद्गिरति त्रिभिः पद्यैर्नमोहमित्यादिभिः । अहं नमः नमा माया यस्य स नमः निर्मायोऽहम् । [illegible] द्रूपाशक्ति[illegible]द्रूपशक्तिमान् शिवो[illegible] स्वस्मादन्यस्य [illegible]स्यानतुभवादात्मानमेव [illegible]नन्दपरंब्रह्मसाम्बसदाशिवं साक्षात्कृत्य नम[illegible] । मम इति मह्यं सच्चिदानन्दपरब्रह्मसाम्बसदा[illegible]य नमः । नमश्शब्दत्रयप्रयोगो वाङ् मनः का[illegible]याणां नमस्काराणां संग्रहाय नमनमिहानुसंधानं परब्रह्मसाम्बसदाशिव गुरुमन्त्रस्वस्वरूपाभिन्नस्य नमो नमाय निर्मायस्वरूपाय तत्फलितमाह । शुद्धायेति । अविद्या माया[illegible] शून्याय तत्फलितमाह । मङ्गलायेति संसारात्मक मङ्गलरहिताय नमश्शब्दप्रयोगः पूर्वपूर्ववत् ॥ २१ ॥

नमो नमस्तं शम्भोर्निराकाराय ते नमः। निर्गुणं निष्क्रियं शान्त-मित्याद्याः श्रुतयो जगुः ॥ २२ ॥

कथं शुद्ध[illegible]पाहितत्वेन तदस्थलक्षणसं-स्कारकर्तृत्वादत्[illegible]हितत्वेन भोक्तृत्वादित्या-शङ्क्य समाधत्ते[illegible]दिन नमो नेति नम इति प्रतीकं नमस्तमिति विवरणम् । नमस्तं परिणाम आकाशादि-प्रपञ्चात्मको [illegible]तु । किन्तु अध्यासमात्रमित्याह । निरा[illegible]येति । तथा च सृष्ट्याद्यभावेन प्रवेशाभावेन च [illegible] शुद्धत्वमित्यर्थे प्रमाणमाह । निर्गुणमिति । जगुरिति [illegible] निष्क्रियं शान्तं निर्विकल्पं [illegible] । शिवमद्वैतं [illegible]ं मन्यन्त इत्यादयो जगुर[illegible] ॥

[illegible] ब्रह्मनिराकार शिवायं शि-वसर्वदा । [illegible]तोऽहं च न मा भद्र शि-वायोऽहं न संशयः ॥ २३ ॥

[illegible] स्वयं व्याचष्टे । नम इति । विक्रियमाणं [illegible] विवरणं तेन फलितमाह । निराकारमिति । निरा-कारं निष्प्रपञ्चं शिवायं निजबोधस्वरूपम् । सर्वदा तेन

नित्यत्वं ध्वनितम् । स्वानुभवमाह । अतोऽहमिति । नमा इति
अहं नमः । हेमद्र मदानिर्विकारत्वान्निर्विघ्नस्वरूप अ
शिवायः । चिद्रूपशक्तिमान् ईश्वरगुरुमन्त्रप्रसादात् ।
अहमपि सच्चिदानन्दब्रह्मरूपः संशयो नष्ट इत्युपसंहरति
न संशय इत्युक्त्वा स्वस्य कृतार्थ... ध्वनिता भवति ।
नसंशय इति ग्रन्थान्ते मङ्गल... पदयोजनम् ॥२॥

इति श्रीमन्त्रराजस्य ... र्शिताः । त्रयोवि-
शतिपद्यैस्तु पद्माचार्य्येण धीमता ... तेषमतिगुरुत्वा-
त्संक्षेपेण यथामति । सेवकानामपि बोधाय मन्त्रतत्त्वप्रकाशिका
॥ २ ॥ गयादत्तेन रचिता विद्वत्... ... । श्रीश्रीकण्ठ-
प्रसादस्य कलिकर्णस्य धीमतः ॥ ३ ॥ श्रौतस्मार्त... निष्ठस्य
गुरुभक्तिरतस्य च । जगद्विख्यातसत्कीर्त्तेराज्ञया तत् ...
दनी ॥ ४ ॥ ... श्रवणमात्रेण तत्त्वज्ञानं प्रजायते । ...
त्सर्व्वमुक्त... त्त्वदर्शिभिः ॥ ५ ॥ नमस्क...
नमस्कर्त्ता नमस्... शिवः । सोऽहं ब्रह्म ...
ब्रह्मानन्दः प्रदर्शितः ॥ ६ ॥

॥ इति श्रीमन्त्रतत्त्वप्रकाशिका ... प्ता ॥

श्रीगुरवे नमः ।



॥ श्रीः ॥

अथ रत्नत्रयपरीक्षा

श्रीमद्भरद्वाजकुलजलधिकौस्तुभ-श्रीमदद्वैतविद्याचार्य-

श्रीविश्वजिद्याजि-श्रीरङ्गराजाध्वरि-तनूजेन

चित्रमीमांसाद्यनेकप्रबन्धकर्तृ-

श्रीमदप्पय्य दीक्षितेन

निर्मिता।

सेयं

चैनपुराख्यग्रामनिवासिना

श्रीबाबू श्रीकण्ठप्रसादनारायणसिंहेन

काश्यां

चन्द्रप्रभा-यन्त्रालये मुद्रापयित्वा

प्रकाशिता।

वैक्रमीय संवत्

१९६२



श्रीगणेशाय नमः ।

अथ रत्नत्रयपरीक्षा ।

सर्वज्ञतादिकं शंभोर्यस्या रूपं विदुर्बुधाः ।
तां नमामि शिवां सत्यज्ञानानन्दस्वरूपिणीम् ॥ १ ॥

अथ रत्नत्रयपरीक्षाख्यामष्टश्लोकीं संक्षेपेण व्याकुर्महे-

नित्त्यं निर्दोषगन्धं निरतिशयसुखं
ब्रह्म चैतन्यमेकं धर्मोधर्मीतिरूप
द्वयमयति पृथग्भूय मायावशेन ॥
धर्मस्तत्रानुभूतिः सकलविषयणी
सर्वकार्यानुकूला शक्तिश्चेच्छादि
रूपो भवति गुणगणश्चाश्रयस्यै
क एव ॥ १ ॥

नित्यं कालत्रयाबाध्यं दोषगन्धेनापि रहितं निरतिशय सुखात्मकम् अद्वितीयमेकं ब्रह्म चैतन्यं मायया कल्पितभेदं सत् धर्मिधर्मभावं अयति प्राप्नोति जीवब्रह्मविभागवदनादि-

रथं धर्मधर्मिविभागः तत्र धर्मः स्वमात्रप्रकाशरूपस्य धर्मिणः परब्रह्मणः सकलप्रपञ्चविषयाऽनुभूतिर्भवति तदुक्तं श्रीकूर्मपुराणे शिवेनैव, तथाऽहं संगतो देव्याः केवले निष्कलः परः॥ पश्याम्यशेषमेवेदं यस्तद्वेद(?) समुच्यत इति॥ सएव धर्मस्तस्य सकलकार्यानुकूला शक्तिः सर्वेपि गुणगणा निर्गुणश्च भवति तदुक्तं श्वेताश्वतरोपनिषदि, पराऽस्य शक्ति-र्विविधैव श्रूयते स्वाभाविकी ज्ञानवलक्रिया चेति। अस्य शक्तिः स्वाभाविकी स्वभावविभागं प्राप्ता ज्ञानरूपा वलरूपा क्रातिरूपा चकारादिच्छा रूपाचेत्यर्थः। वलं नाम प्रयत्नमन पेक्ष्य अङ्गुल्यग्रादिनाऽपि महापर्वतादिधारणानुकूलोगुण-धर्मः ज्ञानरूपा शक्तिः सैव धर्मिणः सकलगुणगणाद्या-त्मिका चेति अभियुक्ता अप्याहुः, शक्तिः शरीरमधिदैवत नरात्मा ज्ञानं क्रुया करणमासनजालमिच्छा?। ऐश्वर्यमायत वरणानि च त्वं किं किं न यद्भवसि देवि शशाङ्कमौ ति ॥

अस्यैव धर्मज्ञानस्य महिमानमुपनिषत्प्रसिद्धं प्रपञ्चयति ।

वेदज्ञा धर्ममेतं प्रविततमखिला-धारमाकाशमाहुः किंचानन्दं मनो वागविषयमधिकं धर्मिणो वर्णय-न्ति ॥ तत्र स्फूर्तिः सुखं च त्रयमपि

जगतां संगिरन्ते तदंशं प्राणाकाशाद्युपायं कतिचिदपि तदालम्बनास्ते वदन्ति ॥ २ ॥

वृहदारण्यकोपनिषदि यदूर्ध्वं याज्ञवल्क्यं यदि वियदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे तद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतंचेत्यादि गार्ग्या पृष्टेन याज्ञवल्क्येन आकाश एतदोतं च प्रोतं चेत्यभिहितं कस्मिन्नु खलु आकाश ओतश्च प्रोतश्चेति पुनस्तया पृष्टेन तेन एतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्तीत्यादिना अक्षरशब्दितं सर्वज्ञत्वादिविशिष्टं ब्रह्म प्रतिपाद्य एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्युत्तरमभिहितं ततस्तत्राकाशशब्देन न भूताकाशः तस्य परिच्छिन्नस्य प्रतिकल्पं भिन्नस्य च सर्वदेशकालवर्तिसकलप्रपञ्चधारणायोगात् अतो धर्मज्ञानरूपा चिदम्बरशक्तिरेव आकाश इत्यवसीयते आसमन्तात्प्रकाशयति सर्वप्रपञ्चं अवभासयतीति च परब्रह्मणः सर्वविषयज्ञानरूपे तस्मिन्नवयवार्थानुगतिसमुद्भावात्॥ यस्यैषा परमा देवी शक्तिराकाशसंज्ञिता। अनन्तैश्वर्ययोगात्मा महेशो दृश्यते स हि इति, श्रीकूर्मसूक्त्या तस्या आकाशशब्दत्वावगमाच्च। एवं छान्दोग्योपनिषद्यपि मन्त्रभागे ऋतं सत्ये प्रतिष्ठितं भूतं भविष्यता सहेति भूतभविष्यद्वर्त-

मानकालिकसकलप्रपञ्चाधारत्वेन प्रकृते सत्वे आकाश एवायं जगदाधार उपानिरज्जतु?मह्यामन्नमथो श्रियं नित्याकाशशब्द प्रयोग मक्षरधर्मिको वृहदारण्यकोक्त आकाश एवायं जगदाधार इत्यवसितं अत्र ऋतशब्देनापि तथाविनादृग्विषय तया निश्चितत्वात् पारिशेष्याच्च वर्तमानमुक्तं अयंचाकाशो भूताकाशादन्य एवेत्यनन्तरमेव स्पष्टीकृतं आकाशस्यैव आकाशो यदेतद्भाति मण्डलमिति, तत्र प्रकृतिवादिनैतच्छब्देन प्रकृतमाकाशं परामृश्य प्रसिद्धाकाशस्याकाश इत्युक्त्या मन्मथस्यापि मन्मथान्तरवत् आकाशान्तरं प्रतीयते तत्रैव आकाशोह वै नामरूपयोर्निर्वहितातेऽथदन्तरातद्ब्रह्मेति निर्विकारतया नामरूपास्पृष्टत्वाद्ब्रह्मणो वैलक्षण्येन मानरूपनिर्बोधतया प्रतिपादित आकाशोपि तद्धर्मभूता चिदम्बरशक्तिरेवं तदा तत्राकाशनामरूपाद्यवगमात् एवंतावद्वाजसनेयिनः आदित आकाशोपि चिद्धर्मज्ञानरूपां चिदम्बरशक्तिं सर्वाधारं सर्वकारणमाकाशमाहुरिति स्थितं, तैत्तिरीयास्तु नामैव वाङ्मनसातीतं परब्रह्मणो निरतिशयानन्दमाहुः। यतो वाचो निवर्तन्ते अप्राप्यमनसा सह। आनन्दं ब्रह्मणो बिद्वान्न बिभेति कुतश्चनेति। अत्र हि ब्रह्मगते परमानन्दे यदेष आकाश आनन्दो नस्यादित्याकाशशब्दसामानाधिकरण्यादस्य चिदम्बरशक्तिरूपत्वमवगम्यते। नच तत्र यदेष इतिप्रकृतानन्दमयपरैतच्छब्दसामानाधिकरण्यं कश्चिद्दोषः आनन्दमयोपि सैव चिदम्बरशक्तिरित्यङ्गीकारात् आनन्द-

मयशब्दो हि प्रचुरानन्दमाचष्टे न तु प्रचुरानन्दविशिष्टं धर्मिणं तत्प्रकृतवचने मयडिति सूत्रस्य अन्नमयं वर्तते यवागूमयं वर्तते प्रचुरतया वर्तते इत्यादिरर्थः शाब्दिकैर्वर्णितः।अन्नमयो यज्ञ इत्याद्युदाहरणानां तु सूत्रस्य अर्थान्तरमाश्रित्य प्रकृतं प्रस्तुतमन्नमन्नमस्मिन् यज्ञे इत्यादिरेवार्थस्तैरङ्गीकृतो न तु तस्मिन्नर्थे प्राचुर्यानुप्रवेशस्तेषामभिमतः इह चावश्यं प्राचुर्यविवक्षया भाव्यं मयटः प्राचुर्यविवरणार्थतयैवाग्रिममीमांसाप्रवृत्तेः सचानन्दमयोक्तः प्रचुरानन्दः परब्रह्मधर्मिक इत्येतदग्रिमात्सएको ब्रह्मण आनन्दः आनन्दं ब्रह्मणोविद्वानित्यतः सिध्यति।नच सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकृते ब्रह्मणि निरूपणीयतद्धर्मरूपस्य प्रचुरानन्दस्य प्राधान्येन निरूपणमप्रकृतासङ्गतमिति वाच्यं, सत्यज्ञानादिमन्त्रोदितगुहारूपतया अन्नमयादिकोशचतुष्टयनिरूपणं कृतं तदन्तर्गतपरमव्योमरूपत्त्वेनानन्दमयनिरूपणं ब्रह्म पुच्छं प्रतिष्ठेति तत्स्थब्रह्म निरूपणमित्यादिप्रकारेण सर्वस्याप्यग्रिमसंदर्भस्य सत्यज्ञानादिमन्त्रार्थविवरणतया संगतेः तथा सदेव सौम्येदमग्र आसीदित्यधीयानाश्छन्दोगाः घटः सन् पटः सन् इति प्रतीयमानां प्रपञ्चसत्तां चिच्छक्त्यात्मकब्रह्मसत्तास्वरूपामावेदयन्ति।इदं हि वाक्यं घटशरावादिकमिदं पूर्वाह्णमृदेवासीदिति लौकिकवाक्यतुल्यच्छायं ततश्च यथा घटशरावादिषु मृत्त्वप्रतीतिः पूर्वाह्णदृष्टमृत्कूटगतमृदेकदेशानुस्यूत्यालम्बना तेन लौकिकवाक्येन सिद्ध्यति एवं घटपटादि

सत्ता प्रतीतिरपि ब्रह्मसता ऽनुस्यूतात्मालम्बना सदेवेत्यादि-वाक्येन सिद्ध्यति एवमाथर्बणास्तस्य भासा सर्वमिदं विभाती-त्याऽऽमनन्तो घटः स्फुरति पटः स्फुरतीति प्रतीयमानं प्रपञ्च-स्फुरणं .ब्रह्मभावरूपतदीयशक्त्यंशम्वाऽऽवेदयन्ति। न चात्र स्फुरतीत्यस्य स्फुरणविषयत्वमर्थः सविता स्फुरति भाति प्रकाशत इत्यादिप्रयोगे स्फुरणार्थस्य तस्य घटः स्फुरतीत्यादि प्रयोगे अर्थान्तरकल्पनाऽयोगात्। न च ब्रह्मभावस्य साधारण्यं ममस्फुरति मम न स्फुरतीत्यादिव्यवहारानुपपतिः। तत्पुरुष-चाक्षुषज्ञानाभिव्यक्तस्य स्फुरणस्य प्रतीतिपरव्यवहारविषय-त्वोपपत्तेः। तथा एतस्यैवानन्दस्य इमानि भूतानि मात्रामु-पजीवन्तीति पठन्तो वाजसनेयिनो वैषयिकादिसुखवृत्तिषु विषयविशेषसंपर्कादिकरणवशात्तारतम्येनाप्यभिव्यक्तपरब्र-ह्मानन्दरूपचिच्छक्त्याशरावर्जीवैरास्वाद्यतइत्यावेदयन्ति तथा तैत्तिरीया अपि आनन्दमीमांसायां यदेष आकाश आनन्दो नस्यादिति प्रकृतमेवानन्दस्य एकोमानुषआनन्द इत्यादि संदर्भे तारतम्यापन्नमानुषाद्यानन्दत्वेनाधीयाना उक्तमर्थ-मावेदयन्ति तथा छन्दोगादयःप्राणाकाशादिविषयोद्गीथादि विद्यास्विच्छक्तिविषया निवध्नन्ति तासु विद्यासु सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सर्वाणि हवा भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्य-यन्तीति सकलभूतोत्पत्तिलयाधारत्वेन तदुपादानत्वप्रतीतेः कूटस्थे ब्रह्मणि तदयोगात्। कोह्येवान्यात्कः प्राण्यादित्यादि

श्रुत्यनुसारेण सकलप्राणनहेतौ चिदम्बरशक्तिरूपे ब्रह्मधर्मे प्राणाकाशशब्दयोरुपपत्तेश्च ॥ २ ॥

एवं धर्मस्य महान्तं महिमानं प्रदर्श्य धर्मिणो धर्मऽस्य च कृत्यबिभागं दर्शयति–

कर्तृत्त्वं तस्य धर्मं कलयति जगतां पञ्चके सृष्टिपूर्वे धर्मः पुंरूपमाप्त्वा सकलजगदुपादानभावंविभर्ति ॥ स्त्रीरूपंप्राप्यदिव्याभवतिचमहिषी स्वाश्रयस्यादिकर्तुः प्रोक्तौ धर्मप्रभेदावपि निगमविदां धर्मिवद्ब्रह्मकोटी ॥३॥

सृष्टिपालनसंहारतिरोधानानुग्रहरूपाणि पञ्चकृत्यानि तिरोधानानुग्रहौ बन्धमोक्षौ, एतेषु विश्वस्य सृष्ट्यादिषु धर्मी-केवलं कर्ता भवति धर्मस्तु पुरुषवनितारूपेण विभागं प्राप्य पुरुषरूपेण उपादानं भवति वनितारूपेण धर्मिणो दिव्यमहिषी भवतीत्यतोपुरुषवनिते नास्मदादिवज्जीवकोटी किंतु ब्रह्मकोटीति वेदविदां सिद्धान्त इत्यर्थः ननु ब्रह्मधर्मस्य ज्ञानानन्देच्छादिगुणस्य वह्निगतदहनादिशक्तिवत्

ब्रह्मगतसृष्ट्यादि शक्तिरूपस्य च कथं न स्वतन्त्रचेतनत्वं येन तस्य पुरुषवनिताविभागः स्यात् उच्यते यथैकस्यैव तस्य ज्ञानानन्दाद्यनेकगुणरूपत्वं एवं धर्मिणं प्रति तथा भूतस्यापि स्वतस्तावद्गुणविशिष्टत्वं स्वतन्त्रचेतनत्वमप्युपपद्यते अतएव 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति' श्वेताश्वतरमन्त्रे देवस्य परब्रह्मणः शक्तावात्मत्वविशेषणं, अस्योत्तर आत्मानन्दमय इत्यानन्दवल्यामात्मत्वनिर्देशश्च बृहदारण्यके गार्गिब्राह्मणे पृथिव्यादि ब्रह्मलोकान्तेषु पूर्वं पूर्वं प्रत्युत्तरोत्तरस्याधारत्वोक्त्यनन्तरं कस्मिन्नु खलु ब्रह्माणि लोका ओताश्च प्रोताश्चेति पुनर्गार्ग्या पृष्टेन याज्ञवल्क्येन गार्गिमाऽतिप्राक्षमितिमूर्द्धा व्यपत्तदातिप्रश्नां वै देवतामति पृच्छसीति तत्रात्मत्वावान्तरविशेषरूपदेवतात्वनिर्देशश्च तत्र हि ब्रह्मणि लोकानामोतत्वं परमाकाशवर्णनीयं सा परा देवता गुरूपसदनादिनियममतिक्रम्य प्रष्टुमनर्हतामतिक्रम्य तां माप्राक्षीरिति खलु तत्र देवतापदे वक्ष्यमाणपरमाकाशपदं प्रयुक्तं अतो धर्मस्य ततः स्वतन्त्रचेतनत्वमप्युपपद्यत एव ॥ ३ ॥

नन्वस्तु तयोः पुरुषवनितयोर्ब्रह्मकोटित्वं कुतोऽवसीयत इत्याकाङ्क्षायामाह ।

योसौ धर्मी स शंभुः स शिव इति परब्रह्म चेति प्रसिद्धो या चोक्ता

धर्मिणोऽस्याविययदिति महिषीसाऽम्बिकोमेतिवित्तम् ॥ यश्चोपादानभूतः पर इह पुरुषः सैव नारायणोक्त्या ख्यातः श्रीकूर्मवाक्यैरधिगमितमिदं नारदस्यापि वाक्यैः।४।

अत्र शिवोधर्मी तद्धर्माणावुमानारायणौ तावपि ब्रह्मकोटी इत्यत्र गमकानि श्रीकूर्मपुराणवचनान्युदाहरिष्यामः तत्र मन्दरशिखरिण्युमासंरक्षणार्थं विष्णुं नियुज्य देवदारुवनं गत्वा तत्र तपस्यतोऽनुगृह्य मन्दरं प्रति निवृत्तः शिवस्तत्र सिंहासने गौर्या नारायणेन च सहोपविष्टे देवर्षि गन्धर्वादिभिः सेव्यमानां स्मिरास्तेति प्रस्तुत्य । दृष्ट्वा सिंहासनासीनं देव्या नारायणेन च । प्रणम्य देवमीशानं पृष्टवन्त्यो वराङ्गनाः। कस्त्वं विभ्राजसे कान्त्या कथं वाला रविप्रभा कोवाऽयं भाति पुरुषः पङ्कजायतलोचन,इति कासां चिद्देव कन्यानां प्रश्नमुपन्यस्य तत्र शिवस्योत्तरवचनानि दर्शितानि । अथ नारायणो गौरी जगन्माता सनातनी, विभज्याहं स्थितो देवः स्वात्मानं परमेश्वरः। न स मे विदुः परं तत्वं देवाद्या न महर्षयः। एकोहं वेदविश्वात्मा भवानी विष्णुरेव च। अहं हि निष्क्रियो धाता केवलो निष्परिग्रहः॥ मत्मेव

केशवं देवमाहुर्देवीमथाम्बिकामिति। एवं शिवेन गौरीनारायणयोः स्वाभेदमुक्त्वा तयोः स्वधर्मिरूपभेदात्मत्वमनन्तरमेवाविष्कृतं। कूटस्थोह्यक्षरोऽव्यापी योगी नारायणाह्वयः। तारकः पुरुषोव्ह्यात्मा केवलं परमं पदम्। सैषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना। शान्ता सत्या सदानन्दा परं पदमिति श्रुतिरिति अत्र पुराणे परमपदशब्देन ब्रह्मधर्मरूपा परा शक्तिर्व्यवह्रियते अतस्तयोरुभयोरपि परमपदत्वोक्त्या रूपभेदत्वमाविष्कृतं तथा पुत्रार्थे कैलासे कृततपश्चरणाय कृष्णाय शिवेनाभिमते वरे दत्तगौरी वचनम्। वत्स जाने तथानन्तां निश्चलां सर्वदाच्युत। अनन्यामीश्वरे भक्तिमात्मन्यपि च केशव। त्वं हि नारायणः साक्षात्सर्वात्मा पुरुषोत्तमः। प्रार्थितोदेव तैः पूर्वं सञ्जातो देवकीसुतः। पश्य त्वमात्मनात्मानं मम त्वं परमंपदम्॥ नावयोर्विद्यते भेदं ऐक्यं पश्यन्ति सूरय इति॥ तथा॥ कैषा भगवतीदेवी शङ्करार्धशरीरिणी। शिवा सती हैमवती यथावद्ब्रूहि पृच्छताम्। तेषां तद्वचनं श्रुत्वा ऋषीणां पुरुषोतमः। प्रत्युवाच महायोगी ध्यात्वा स्वं परमं पदमिति। विष्णोः परमपदत्वोक्त्यनन्तरं, यासा माहेश्वरीशक्तिर्ज्ञानरूपाऽतिलालसा। व्योमसंज्ञा पराकाष्ठा सेयं हैमवती तथ त्यादिना हैमवती स्वरूपतत्प्रभाववर्णनपरे श्रीकूर्मवचनसन्दर्भे कं सर्वगतं सूक्ष्मं कूटस्थमचलंध्रुवम्॥ योगिनस्तत्प्रपश्यन्ति महादेव्याः परंपदमिति गौर्याः परमपदत्वेन चेह ब्रह्मधर्मरूपा शक्तिरुक्ता तथा मङ्कणकं प्रति शिवेन विश्वरूपप्रदर्शने कृते, किमेतद्भगवद्रूपं

सुधीरं विश्वतोमुखम्। का च सा भगवत्पार्श्वे राजमाना[illegible]
स्थितेति। मङ्कणपृष्टेन शिवेन स्वस्वरूपप्रभावकथनानन्तरं, नमसा परमा माया प्रकृतीस्त्रिगुणात्मिका।प्रोच्यते मुनिभिः शक्तिर्जगद्योनिःसनातनी। सएव मायाया विश्वं व्यामोहयति विश्ववित्। नारायणः परो व्यक्तो मायारूपमिति श्रुतिरिति मामकं देशं दृष्ट्वेयं ममशक्तिः सैव नारायणरूपेणापि जगन्मोहयतीत्युक्त्वा, जगदेतदनाद्यन्तं ब्रह्मण्येव व्यवस्थितम्। तदात्मकं तदव्यक्तं तदक्षरमिति श्रुतिरिति। सर्वस्य प्रपञ्चस्याव्यक्ताक्षरादिशब्दितब्रह्माश्रितत्वमभिधाय किंतद्ब्रह्मेत्याकाङ्क्षायां आत्मानन्दंपरंतत्त्वं चिन्मात्रंपरमंपदम्।आकाशं निष्कलंब्रह्मतस्मादन्यन्न विद्यतइति।यत्परमपदाकाशशब्दाभ्यां प्रसिद्धं तदिह ब्रह्मोक्तं तस्माच्चेतनाचेतनात्मकप्रपञ्चकारणादन्यन्नास्तीत्युपसंहृतं तत्र का च सा भगवत्पार्श्वे इति प्रश्नस्यैतान्प्रतिवचनं सैव नारायणरूपेणावतिष्ठते सैव परमाकाशपरमपदरूपा परब्रह्मणः पराशक्तिरित्येवं तन्महिमप्रख्यापनमेव। अतोपि गौरीनारायणयोर्ब्रह्मधर्मभूतपरमाकाशपरमपदाख्यचिच्छक्तिरूपभेदात्मकत्वमभिमतमिति ज्ञायते। ननु कूर्मपुराणे प्रथमाध्याय एव, आस्ते द्विजातिप्रवर इन्द्रद्युम्न इति श्रुतः। पूर्वजन्मनि राजासावदृश्यं शङ्करादिभिः। दृष्ट्वा मां कूर्मसंस्थानं श्रुत्वा पौराणिकीं स्वयम्। संहितां मन्मुखाद्दिव्यां पुरस्कृत्य मुनीश्वरान्॥ ब्रह्माणं च हरं देवं देवानन्यांश्च शक्तिभिः॥ मच्छक्तौ संस्थितान् बुध्वा मामेव शरणं गतः

इति । अस्यास्त्वंशानधिष्ठाय शक्तिमन्तोऽभवन् द्विजाः ॥
ब्रह्मेशानादयो देवाः सर्वशक्तिरियं मम ॥ सैव सर्वजगत्सूतिः
प्रकृतिस्त्रिगुणात्मिका ॥ प्रागेव मत्तः संजाता श्रीकल्पे या
प्रवासिनीति, श्रीकूर्मरूपिणा भगवतैव ब्रह्मेशानादिभ्यः स्वय-
मेव पर इति प्रतिपादितं कथमुपक्रान्तपरापरभवव्यत्यये-
नोपरि प्रतिपादितमिति चेत् उच्यते तत्र ब्रह्मणः संहार-
रुद्राच्च परत्वं प्रथमाध्याये प्रतिपादितं तयोरेव तत्प्रसाद-
क्रोधप्रभवत्वेन द्वितीयाध्याये प्रतिपादनात् तत्तु परमशि-
वादपि तस्य मूर्त्तित्रयापेक्षयाऽपि परत्वस्य शास्त्रान्ते प्रति-
पादनं कृतम् ॥ स तां शक्तिं समास्थाय स्वयं देवो महेश्वरः ॥
करोति देवान् विविधान् ग्रसते चैव लीलया ॥ इज्यते सर्व-
यज्ञेषु ब्राह्मणैर्वेदपारगैः ॥ सर्वकामप्रदो रुद्र इत्येषा वैदिकी
श्रुतिः । सर्वासामेव शक्तीनां ब्रह्मविष्णुशिवात्मिकाः ॥ प्रधानाः
संस्मृता देवाः शक्तयः परमात्मनः ॥ आभ्यः परस्ताद्भगवान्
परमात्मा सनातनः । गीयते सर्वशक्त्यात्मा शूलपाणिर्महेश्वरः ।
एतमेके वदन्त्यग्निं नारायणमथापरे ॥ इन्द्रमेके परे प्राणं ब्रह्माण
मपरे जगुः ॥ ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः ॥ एकस्य
रुद्रस्य भेदास्ते परिकीर्त्तिताः ॥ यं यं भेदं समाश्रित्य यजन्ते
परमेश्वरम् ॥ तत्तद्रूपं समास्थाय प्रददाति फलं शिव इति ॥
किंच कूर्मपुराणे य इन्द्रद्युम्नं प्रतिब्रह्मेशानादिदूरस्वभावो वर्णि
तः स एव मुमुक्षुस्तेन शिवमहिमावर्णनपूर्वकं शिवज्ञानप्रदा-
नेन शिवपदप्राप्तिरूपं मोक्षं प्राप्त इति प्रथमाध्याये वर्णितं

अतोपि ज्ञायते तुरीयः स शिव इति तदिदमग्रे स्फुटीकरिष्यामः ब्रह्मविष्णोर्ब्रह्मसंहाररुद्रयोश्च नियतः परापरभावो ऽभिमतः, किंतु वरगोष्ठ्यात्मा येन लीलया कालविशेषेषु व्यवस्थितः अत एव द्वितीयाध्याये, तिस्रस्तु मूर्त्तयः प्रोक्ताः ब्रह्म विष्णुशिवात्मिकाः॥ रजः सत्वतमोयोगात्परस्य परमात्मनः॥ अन्योन्यमनुरक्तास्ते अन्योन्यमुपजीवकाः। अन्योन्यप्रणताश्चैव लीलया परमेश्वरा इति । तस्माद्युक्तमुपरितनं सर्वं गौरीनारायणयोः शिवस्य च धर्मधर्मिभावस्य तत्कृतगुणप्रधानभावस्य च व्याख्यानमिति सर्वमनवद्यम् ॥ एवं गौरीनारायणयोः शिवस्य च सत्यपि तत्तदुपासनाफलविशेषफलप्रदानाद्यनुगुणे काल्पनिके गुणप्रधानभावे वस्तुतस्तयोर्ब्रह्मकोटित्वमपि तत्रैवाविष्कृतम् । अस्यां सर्वमिदं जातमत्रैव लयमेष्यति। एषैव सर्वभूतानां गतीनामुत्तमा गतिः॥ एष धाता विधाता च कारणं कार्यमेव च । कर्त्ता कारयिता विष्णुर्भुक्तिमुक्तिफलप्रदः ॥ भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक्॥ स्रष्टा पाता वासुदेवो विश्वात्मा विश्वतो मुख, इत्यादि वचनम् ॥ संदर्भैः एतानि कूर्मवचनानि शिवगौरीनारायणाभेदे प्रमाणीकृतानि॥ अथ सनत्कुमारवचनानि तत्र प्रमाणीक्रियन्ते, स्कांदे सनत्कुमारसंहितायां काञ्चीमाहिमवर्णनं प्रस्तुत्य, यत्र देवी भगवती शङ्कराराधनेरता। अद्यापि लोकरक्षार्थं दृश्यते नाकृतात्मभिः॥ भिक्षमायां महादेवं ज्ञात्वा यत्र स्वयं शिवा॥ शिवानन्दमनाद्यन्तं स्वात्मानं प्रददौ शिवेति, तस्याः कामा-

शिवं सदासन्निधानमुक्त्वा तत्पुरीशः पुराचासीद्राजासिद्ध-नगोपमः ॥ काशिराजो यथा काञ्च्यां काश्यां काञ्चीश्वरस्तथा ॥ राजा प्रभाकरो नाम प्रभाकरसमप्रभः ॥ वैष्णवः शिवधर्मज्ञः केशवार्चनतत्परः ॥ काशिराजस्य तनयो दिवोदासो भुवि सुव्रत ॥ पद्मिनी नाम तस्यासीद्भार्या सत्या पतिव्रता ॥ देव्या-राधनतत्त्वज्ञा तत्परा तत्परायणा ॥ तैस्तैर्भावैः प्रियतमै रर्चयती महेश्वरीम् । पतिव्रता तु नारीणां तत्प्रिया तत्पतीनपि ॥ तेभ्यो मनोरथान् दत्वा प्रीणयामास तैश्च सा ॥ प्रीयतां पार्वती देवी विद्यादेहातिनिर्मला ॥ या जगद्रक्षणरता दीनानाथा-दिपोषिका इत्यादिना काञ्चीपुर्यामपि विष्णुभक्तं राजान-मम्बिकाभक्तां तस्य महिषीं तयोरिष्टदेवताराधनं वर्णयित्वा, एवं देव्यात्मना स्वेन परमेण जनार्दनः ॥ दम्पत्योरेककार्यत्वा-देक एव द्विधाऽर्चितः, इति दम्पतिभ्यामाराधितयोर्गौरीना-रायणयोरैक्यं स्पष्टमुक्तम् ॥ एष नारायणो देवः पुराणः पुरुषोत्तमः ॥ प्रभाकरस्य पद्मिन्या भक्त्या तुष्टो जनार्दन, इत्य-नन्तरमुभयोरपि भक्त्या नारायणस्यैव तुष्टत्वोक्त्या, प्रसन्नः सर्वभावेन सद्भक्त्या वाङ्मनोऽतिगम् ॥ पूजान्ते दर्शयामास स्वात्मानं वेदमूर्धगम् ॥ श्रीभूमिसहितं साक्षागरुडस्कन्धमास्थि-तमिति नारायणात्मनैव वरदानाय सन्निधानोक्त्या तत-स्तं दम्पती दृष्ट्वा दिव्येनाक्षेन चक्षुषा ॥ वासुदेवप्रसादेन क्षीण-निःशेषपातकौ ॥ प्रीतौ च परया भीत्या स्तोतुं तमपि नक्ष-मावित्यादिना तयोर्नारायणप्रसादेनैव पापक्षयादिसकल-

लाभोक्त्या च गौरीनारायणयोरैक्यं दृढीकृतं गौर्याश्च [illegible]तिशयानन्दशिवधर्मत्वं, शिवानन्दमनाद्यन्तं स्वात्मानं प्रददौ शिवेति प्राक् प्रतिपादितेन नारायणस्याप्यर्थात्तत्त्वं सिद्धं तस्य च धर्मिरूपशिवाभेद, स्त्वद्विधानां च सर्वेषां सद्भक्तानां नृपोत्तम॥ मुक्तिः करतलस्थैव पुनर्जन्मविरोधिनी॥ मत्प्रसादान्न संदेहः किमुताग्रे स्थितं मयीति तद्वचनाकर्णनात्तद्दर्शनमात्रेण स्वस्य मुक्तिं भाविनीं निश्चित्य कृतकृत्यतां मन्वानस्य तत्प्रतिज्ञातमुक्तिपदालाभोपयोगिकाशीवासपाशुपतव्रतचिकीर्षोत्पादनार्थं अशेषोपनिषद्वेद्यं न यस्मात्परमं पदम्॥ तस्मिन् पाशान्समुच्छिद्य शोषयित्वा विदात्वतान्॥ प्लावनादमृतीकाराच्छिवत्वस्य प्रभावनात्॥ त्यक्त्वा पशुत्वं मां प्राप्य न कश्चिज्जायते पुनरिति, प्रभाकरं प्रति त्वद्वचनेन पाशुपतव्रतानुष्ठानलब्धशिवप्राप्तेर्मां प्राप्येति स्वप्राप्तिरोक्त्या स्फुटीकृतः तदनन्तरं च, विद्वद्भिरखिलैर्वेद्यो यस्त्वमेव जनार्दन॥ संप्राप्ताद्य मया देव किं ते तत्परमं पदमिमिति, पृष्टवन्तं प्रभाकरं प्रति । अपरं च पदं राजन् परमं च पदं मम॥ भोगैश्वर्यप्रसक्तानामपरं प्राप्यते पदम्॥ विरक्तानां मुमुक्षूणामात्यन्तिकलयार्थिनाम्॥ भस्मज्योतिर्दिदृक्षूणां शिवं तं सोममीश्वरम्॥ अपरावर्तिनां साक्षात्परमं पदमिष्यते॥ वर्णाश्रमाचारयुतः कृत्वा पाशुपतं व्रतं॥ योगं पाशुपतं युञ्जन् परमभ्येति तत्पदमित्युक्त्वा, ततः। किं तद्व्रतं कथं कार्यं कः पाशच्छेदनं च किम्॥ शोषणं दहनं प्लावममृतीकरणंतथा॥

शर्वः पाशुपतो योगः कथं वा शिवमर्चना ॥ का मुक्तिः किंच विज्ञानं प्रार्थ्यं यस्मान्न विद्यते॥ कः शिवः कः शिवानन्दः प्रसिद्धः परमेश्वर, इति पृष्टवन्तं तं प्रति त्वत्पृष्टार्थपरिज्ञानार्थं ब्रह्मादयः काश्यां मामुद्दिश्य तपस्यति त्वमपि तत्र गत्वा तपः कुरु द शवत्सरान्ते संनिधाय तेभ्यस्तुभ्यं चोपदेक्ष्यामीति काश्यां तपांसि तं नियुज्य तथैव व तस्मिन् काले सन्निधाय ब्रह्मादिभ्यः प्रभाकरसहितेभ्यः पाशुपतव्रतादिस्वरूपोपदेशानन्तरं प्रभाकरं प्रति द्वादशवार्षिकं पाशुपतं व्रतमनुष्ठाय अश्वमेधं कृत्वा तत्समाप्त्यनन्तरं विश्वेश्वरं दृष्ट्वा दक्षिणामूर्त्तिसन्निधिमागच्छेत्युपदिश्य,तत्र द्रक्ष्यसि मां देवं विश्वात्मानं पिनाकिनम् ॥ सुमहानन्दसहितं वृषराजं समास्थितमित्युक्त्या च स्फुटीकृतनारायणस्य शिवाभेदेनैव तदभिन्नाया गौर्याः शिवाभेदोप्यर्थसिद्धः। नारदखण्डे प्रथमे खण्डे उमामहेश्वरोत्पतौ देवीं प्रति हरिश्चन्द्रवाक्यम्।ततः स नृपतिस्ताभ्यामगमद्विधिपूर्वकम्॥ कृत्वा नतिंततोवाक्यं विनयादिदमब्रवीत्। पुरा देवि मयानन्दपूरव्याकुलचेतसा ॥ न नता त्वं न मेकोयं तस्मात्त्वं कर्तुमर्हसि ॥ देहार्धधारिणी देवी सदा त्वं शूलधारिणः तस्मात्तस्मिन्नते कस्मान्ननता त्वं वदस्व मे ॥ यस्तं नमति देवेशं तेन त्वं सर्वदा नता ॥ नतायां स्यादिति मे मतिः। तथापि च पृथक् येन मया त्वं शम्भुना सह॥एकासने समारूढा तत्समं देवि पूजिता।तस्मात्कुरु प्रसादाद्य यः पुरोक्त पुरःपणेनेति ॥ ननु हरिवंशे पारिजातसंहितायां पारिजातप्रा-

र्थनार्थं भगवता निसृष्टार्थदूततयेन्द्रं प्रति प्रेषितेन नृसिंहो नानाविधैरुपायैः प्रार्थित इन्द्रो यदा पारिजातं न दातुमैच्छत् तदा तं प्रति रहसि भगवन्महिमप्रख्यापनार्थानि नारदवचनानि पठ्यन्ते । य एको विश्वमध्यास्ते प्रधानं जगतो हरः । प्रकृत्या यं परं सर्वे क्षेत्रज्ञं वै विदुर्बुधाः ॥ तस्याव्यक्तस्य यो व्यक्तो भागः सर्वभवोद्भवः ॥ तस्यात्मा प्रथमो देवी विदुमः सर्वस्य धीमतः ॥ प्रकृत्या प्रथमो भाग उमा देवी यशस्विनी । व्यक्तः सर्वमयो विष्णुः स्त्रीसंज्ञो लोकपावनः ॥ रुक्मिण्याद्याः स्त्रियस्तस्य व्यक्तत्वे प्रथमो गुणः ॥ अव्यक्ता प्रकृति र्देवी गुणी देवो महेश्वरः ॥ गुणिनश्चाव्यपायश्च सादरः प्रथमो गुणः ॥ नारायणो महातेजाः सर्वकृल्लोकभावनः ॥ भोक्ता महेश्वरो देवः कर्त्ता विष्णुरधोक्षजः ॥ ब्रह्मा देवगणाश्चान्ये पश्चात्सृष्टा महात्मना ॥ महादेवेन देवेश प्रजापतिगणास्तथा ॥ एवं पुराणपुरुषो विष्णु र्देवेषु कथ्यते । अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथेति ॥ अत्र शिवस्यांशो नारायणः प्रकृत्यंशो गौरीति गौरीशिवयोर्गौरीनारायणयोश्च भेदं प्रतिपाद्य नारायणस्य परमशिवभेदः प्रतिपाद्यत इति प्रतीयते ॥ उच्यते ॥ एतान्यपि वचनानि श्रीकूर्मराजसनत्कुमारवचनानुरोधेन नेतव्यानि, तन्नयनप्रकार इत्थं तस्याव्यक्तस्येत्यत्राव्यक्तशब्देन प्रकृतिरूपा चिच्छक्तिरुच्यते अव्यक्ता प्रकृतिर्देवीत्यग्रे विवरणात् इह स्त्रीलिङ्गनिर्देशाभावस्तस्येति हरपरामर्शिपदे सामानाधिकरण्यात् तत्सामानाधिकरण्यनिर्देशस्तु चिच्छक्ते

शवं (?)दस्फुटीकरणार्थः। तथा च तस्य हरस्याव्यक्तचिच्छक्त्यावस्थापन्नस्य योऽव्यक्तो भागः स कीदृशः सर्वभवोद्भवः सर्वकार्योत्पत्तिहेतुः अनेन सर्गादौ चिच्छक्तेः सकलकार्यवर्गकारणतया व्यक्तो भागः कश्चिदाविर्भवतीति लभ्यते तस्य कारणात्मना व्यक्तस्य भागस्य संवन्धी प्रथमश्चान्त्य कार्यवर्गस्यावान्तरकारणभूतान् हिरण्यगर्भादीनपेक्ष्याद्यवोधकवर्गत्वं स्वरूपं चोपादानभूतो भगवान् विष्णुरिति सर्वस्य धीमतो विवेकिनो मतमिदं व्यक्ते भागे कस्मिंश्चिद्विभक्ते सत्यव्यक्तभागो यस्तन्मूलतया स्थितः सा भगवती गौरीति तस्मात्सर्वमनवद्यम्। एवं शिवस्य धर्मित्वं गौरीनारायणयोस्तद्धर्माव्यक्तभागरूपत्वं तत एव त्रयाणां ब्रह्मकोटित्वं समर्थितम् ॥ ४ ॥

अथ नारायणस्य महिमानं शिवप्राप्तिमिच्छतां
तत्तत्समाश्रयणावश्यभावं च दर्शयति—

तस्यैवाद्यस्य पुंसः परिणतिरखिलोऽप्यम्वरादिर्विकार, स्तस्यैवांशो विरञ्च्यादिक (मपि) निखिलोप्येष संसारिवर्गः॥ प्राप्यं कृत्वैव तस्य प्रपद्न? ममृतस्याद्यमानन्दमूर्तिः,स्थानं

भर्गस्य जुष्टं तदमृततनयै दैवतैः पुराणैः ॥ ५ ॥

हरेरेकस्यैव परिणामो वियदादिसर्वो विकारः, "यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इति महोपनिषदि । तस्य बाह्याभ्यन्तरसकलनामरूपव्यापकत्वश्रवणात् । नच नीरूपस्य परिणामानुपपत्तिः यदातम इति मन्त्रे 'प्रज्ञा च तस्मात्प्रसृता पुराणीति' धर्मज्ञानस्य प्रसरणोक्त्या परिणामित्वविभावनात्। ब्रह्ममीमांसायां कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवेति सूत्रेण कृत्स्नैकदेशविकल्पेन ब्रह्मणो जगदाकारपरिणामानुपपत्तिमाशङ्क्य श्रुतेस्तु शब्दमूलत्वादिति सूत्रेण श्रुत्युपपन्नेर्थे नैवंभूतकुतर्कावकाश इति समाहितत्वाच्च ॥ हरिवंशे कैलासयात्रायां "यत्तत्कारणमाहुस्तत्तमः प्रकृतिसंज्ञितम् । मायाभूतं जगद्योनिं प्रधानं कारणात्मकम् ॥ सत्वं रजस्तमो विष्णोर्जगदण्डं जनार्दनात् ॥ तस्य कारणमाहुस्त्वां सांख्यास्तत्वविदो हरे ॥ ततो महान् समुत्पन्नः प्रकृतेर्जन्मकारणम् ॥ तद्रूपेण भवान् विष्णो परिणाम्यधितिष्ठतीति," कृष्णं प्रति शिववचनेन तस्य परिणामिकारणत्वस्फुटीकरणाच्च । प्रकृते जन्मकारणं भवान् प्रकृतिरूपेण (ना) महदादिकार्यजातमधितिष्ठति व्याप्नोतीत्यर्थः ततः सर्वे संसारिणो नारायणस्यैवांशाः 'ममैवांशो जीवे लोके' जीवेत्यादिस्वारस्यात्तदाश्रयणं कृत्वैव शिवस्य दिव्यं स्थानं

शर्व परम्। त्वामनाश्रित्य विश्वात्मन्न योगी मामुपैष्यति। पालये-त्तज्जगत्कृत्स्नं सदेवासुरमानुषमिति, कौर्मे नारायणं प्रति शिववचनात् देव शिवस्य दिव्यं स्थानमानन्दमूर्त्तीत्यादिना विशेषितं तद्धि प्रकृतिमायामहामायाविकारमलिनमिश्रशुद्ध-प्रपञ्चातीतं परमशिवानादिचिच्छक्तिरूपपरमानन्दमयं शिव-पुराणादिषु प्रसिद्धम्। अमृतस्य एतानि ह वा अमृतस्य ना-मधेयानीत्यमृतशब्दितस्य शिवस्य तनयैर्देवानामपिदेवैः पुराणैर्जुष्टं तदत्र तनयैरित्यनेन युजे वां ब्रह्म पूर्व्यं नमोभि-र्विश्लोकयन्ति पथ्येव सूरेः शृण्वन्ति विश्वे अमृतस्य पुत्रा अमेधानाप्नोति दिव्यानि तस्थुरिति श्वेताश्वतरोपनिष-न्मन्त्रप्रतिपन्नस्तेषां महिमा स्मारितः। अस्य मंत्रस्यायमर्थः॥ वां युवयोः शिवशक्त्योर्मध्ये पूर्व्यं पूर्वं स्वार्थे यत्प्रत्ययः विशे-ष्यतया प्रधानभूतं ब्रह्म शिवरूपं नमोभिर्युजे युनज्मि छान्द-सोविकरणप्रत्ययः शिवस्य सर्वनमस्कारपर्यवसानभूमि त्वान्नमस्काराङ्कितैः श्लोकैर्भजामीत्यर्थः नमस्कारश्लोका वि-शेष्यन्ते सूरेः विदुषः शिवस्य रूपाभिज्ञस्य शिवज्ञानान्मुक्तेः प्राप्तस्य मम श्लोकाः वाचिकादिनमस्कारसंदर्भरूपाः अहं श्लोककृदिति मुक्तकृतत्वेन प्रसिद्धाः पथ्येव पथि हिताः त्व-रिता निर्विकारादिमार्गगमनाः सदश्वा इव वियन्ति निरर्ग-लप्रवाहतया निर्गच्छन्ति पथ्यशब्दात्सुपांसुलुगित्यादिसूत्रेण जस आकारादेशः, विश्वेप्यमृतस्य शिवस्य पुत्राः नन्दिके-श्वरादयः पारिषदाः शृण्वन्ति अमृतस्य पुत्रा विशेष्यन्ते ये

दिव्यानि दिवि भवानि चिदाकाशरूपे नित्यकैलासे संहितानि धामानि भवनानि आतस्थुरिति देवानामपि देवैरित्यनेन देववृत्ताद्यसाम्यप्रतिपन्नस्तेषां महिमा स्मारितः, तत्र हि पृथिवीषदो दिविषदो ऽन्तरिक्षसदो दिविषदो ऽप्सुषदो दिविषद आकाशसदश्चेत्येवं सकलजगद्व्यापिनस्ते प्रतिपर्यायं द्विवारमावर्त्तितैर्देवदेवैः सादरं? सकलदेवनियन्तृत्वेन प्रतिपादितः तथा शिवपुराणेऽप्युपपादितम् । "ते हि साक्षाद्दिविषदो ह्यन्तरिक्षसदस्तथा ॥ पृथिवीषद इत्येते देवदेवव्रतेस्तुता, इति पुराणै रित्यनेन दिव्या गणा वहुरूपाः पुराणा इत्यादि पुरुषसूक्तमंत्रप्रातिपन्नस्तेषां स्मारितः, तेषामेव महिमजातं सौषुप्तिके पर्वणि भगवता व्यासेन संगृहीतम्। कामकारकराः सिद्धास्त्रैलोक्यस्येश्वरेश्वराः ॥ नित्यानन्दाः प्रमुदिता वागीशा गतमत्सराः ॥ प्राप्याष्टगुणमैश्वर्यं तेन यान्ति च विस्मयम् ॥ येषां विस्मायते नित्यं कर्मभिर्भगवान् भवः॥ मनोवाक्कायनिरतान् याति पुत्रानिवौरसान्॥ श्रुतेन ब्रह्मचर्येण तपसा च दमेन च। ये समाराध्य शूलाङ्कं तत्सायुज्यमुपागता, इति अत्र त्रैलोक्येश्वरेश्वरा इत्यनेन देवदेवत्वं संगृहीतम्। वागीशा इत्यनेन श्लोककर्तृत्वं श्लोकश्रोतृत्वं च संगृहीतम् याति पुत्रानिवौरसानित्यनेनाभूतपुत्रत्वं संगृहीतम्, दिव्यागणा वहुरूपाः पुराणा इति मन्त्रोक्तं वहुरूपत्वं तु प्रागेव तेषां वहुविधघोरशान्तरूपोक्त्या संगृहीतम् ॥ ५ ॥

अथ गौरीमहिमप्रदर्शनपूर्वकं तस्याः शिवेन सहोपासनानियमं दर्शयति--

ख्याताः कोट्योनवाष्टादशपरिमिताः स्थाणुवैकुण्ठवेधाः शक्तीनां यत्कलांशास्त्रिभुवनविषयाः शङ्करस्यैव भोग्याः॥ या विख्याता कृपाब्धिः श्रुतिशिरसि परब्रह्मविद्याप्रदात्री साहित्यं सा भवानी भजति नियमतः शङ्करोपासनासु ॥ ६ ॥

अत्र सर्वशक्तीनामुमांशत्वेन शङ्करभोग्यत्वे वाराहपुराणवचनानि,"नवकोटयस्तुचामुण्डाभेदाभिन्नाव्यवस्थिताः । या रौद्रा तामसी शक्तिः सा चामुण्डा प्रकीर्त्तिता॥ अष्टादश तथा कोट्योवैष्णव्या भेद उच्यते। या सातु राजसी शक्तिः पालिनी सैव वैष्णवी ॥ या ब्रह्मशक्तिः सत्वस्य सा सत्वा वै प्रकीर्त्तिता। एतेषु सर्वभेदेषु पृथगेकैकशो धरे ॥ सर्वासां भगवान् रुद्रः सर्वगत्वात्पतिर्भवत् ॥ यावन्त्यस्ता महाशक्त्यस्तावद्रूपाणि शंकरः ॥ कृतवांस्तास्तु भजते पतिरूपेण सर्वदेति" उमायाः परब्रह्मविद्याप्रदातृत्वं स तस्मिन्नेवाकाशे स्त्रियमाजगाम

वहुशोभमानामुमां हैमवतीमित्यादि तात्वकारोपनिषद्वाक्ये "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति" श्वेताश्वतरोपनिषन्मन्त्रे च प्रसिद्धं शिवोपासनायां तस्याः सहोपासनानियमः "तस्मात्सहजया शक्त्या हृदि पश्यन्ति ये शिवम् ॥ तेषां शाश्वतिकी शान्तिर्नेतरेषामिति श्रुतिरिति," शिवपुराणे प्रतिपादित इति ॥६॥

शिवोपासनायाः साक्षान्मुक्तिहेतुमाह—

या श्रीकूर्मेण चान्त्याश्रमरतविषया भावनोक्ता तृतीया । दिव्यस्थानप्रदात्री सगुणविषयिणी शंकरालम्बना सा॥यत्वन्ये भावने ते सरसिजनयने ऽनादिशक्त्या च युक्ते। प्रापिण्यास्ते तु तस्याः क्रमिकफलयुतैर्मौक्तिकं सांख्यमाप्ते ॥ ७ ॥

श्रीकूर्मपुराणे इन्द्रद्युम्नं प्रति कूर्मवचनानि, "त्रिविधा भावना ब्रह्मन् प्रोच्यमाना निबोध मे। एका मद्विषया तत्र द्वितीया व्यक्तसंश्रया॥ अन्त्या च सगुणा ब्राह्मी विज्ञेया त्रिगुणात्मिका। असामन्यतमां वाऽथ भावनां भावयेद् बुधः । अशक्तः

संश्रयेदाद्यामित्येषा वैदिकी श्रुतिः॥ तस्मात्सर्वप्रयत्नेन तन्निष्ठस्तत्परायणः । तामाराधय विश्वेशं ततोमोक्षमवाप्स्यसीति, भावनानामन्त्याश्रमाद्यधिकारित्वं श्रीकूर्मेण देवर्षीन् प्रति द्वितीयाध्याये उक्तम् । योगी च त्रिविधो ज्ञेयोभौतिकः सांख्य एव च॥ तृतीयोऽन्त्याश्रमी प्रोक्तो योगमुत्तममाश्रितः॥ प्रथमा भावना पूर्वे सांख्ये त्वक्षरभावना॥ तृतीये चान्तिमा प्रोक्ता भावना पावनेश्वरीति, अन्त्याश्रमिणामुक्त्यर्थं पाशुपतव्रतानुष्ठानपूर्वकं भस्मोद्धूलनत्रिपुण्डधारणरुद्राक्षधारणपञ्चाक्षरीजपादिनिष्ठाः एतत्कूर्मपुराण एव सशीलं राजानं मोक्षार्थं यतमानं प्रस्तुत्योक्तम्। "अथास्मिन्नन्तरे ऽपश्यत्समायान्तं महामुनिम् । श्वेताश्वतरनामानं महापाशुपतोत्तमम्। भस्मसन्दिग्ध सर्वाङ्गं कौपीनाच्छादनान्वितम् । तपसाकर्षितात्मानं शुक्लयज्ञोपवीतिनम्॥ समाप्य संस्तवं शंभोरानन्दाश्रुविलक्षणः॥ ववन्दे शिरसा पादौ प्राञ्जलिर्वाक्यमब्रवीत्। धन्योस्म्यनुगृहीतोस्मि यन्मेसाक्षान्मुनीश्वरः ॥ योगीश्वरोऽद्यदृष्टोयं योगी योगविदाम्बरः॥ अहो मे सुमहद्भाग्यं तपांसि कलितानि मे । किं करिष्यामि शिष्योऽहं भक्तं मां पालयानघ ॥ सोऽनुगृह्याथ राजानं सुशीलं शीलसंयुतम्॥ शिष्यत्वे परिजग्राह तपसा क्षीण कल्मषम्। सांन्यासिकं विधिं कृत्स्नं कारयित्वा विचक्षणः।ददौ तदैश्वरं ज्ञानं स्वशाखोक्तं हितप्रदम् ॥ अशेषवेदसारं तत्पशुपाशविमोक्षणम् ॥ अन्त्याश्रममिति ख्यातं ब्रह्मादिभिरनुष्ठितम्॥ उवाच शिष्यान् संप्रेक्ष्य एतदाश्रमवासिनः॥ ब्राह्मणान्

क्षत्रियान्वैश्यान्ब्रह्मचर्यपरायणान्॥ मया प्रदर्शितं सांख्यमधी-त्यैवेह योगिनः॥ समासन्ते महादेवं व्योमवन्निष्कलं शिवम्॥ इह देवो महादेवोरममाणः सहोमया। अध्यास्ते भगवानास्मिन् भक्तानामनुकम्पया। इहाशेषजगद्धाता पुरा नारायणः स्वयम्। आराधयन्महादेवं लोकानां हितकाम्ययेत्यादिना श्वेताश्वत-राणां मन्त्रोपनिषदि पाशुपतनिरूपणं मुक्त्यर्थं च योगनिरू-पणं च कृतम्। सात्वत्र मया दर्शिता नित्यमेवोक्ता तत्र ह्याख्या-यते तपः प्रभावाद्देवप्रसादाच्च ब्रह्मन् श्वेताश्वतरो ऽयं विद्वान् अन्त्याश्रमिणः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमिति सांख्ये त्वक्षरभावनेति द्वितीयाऽव्यक्तसंश्रयेति चाक्षराव्यक्त-शब्दाभ्यां परब्रह्मणः शिवस्य चिच्छक्तिरुक्ता "जगदेतदनाद्य न्तं ब्रह्मण्येव व्यवस्थितम्॥ तदात्मकं तदाऽव्यक्तं तदक्षर-मिति श्रुतिरिति' कौर्मेऽत्र तस्यामव्यक्ताक्षरव्यवहारदर्शनात् इयमेव च तृतीया सगुणभावना साक्षात्पारमेश्वरी हि प्रस्था-नप्रदा परममुक्त्युपायभूता च। आद्या तु भावना तद्द्वारा, अत एव चिरं नारायणमेवोपासितवत इन्द्रद्युम्नस्य द्वितीय-भावनाप्राप्तिपूर्वकं तृतीयभावनया निरस्तनिखिलद्वैतजीवा-भिन्ननिर्गुणब्रह्मज्ञानसाधनोत्तमलोकप्राप्तिस्तस्यपारमेश्वरदि-व्यस्थानप्राप्तिश्चोक्ता. "संप्राप्य भावनामन्त्यां ब्राह्मीमक्षर-पूर्विकाम्॥ अवाप परमं योगं येनैकं परिपश्यति॥ यं वि-निद्रा जितश्वासाः काङ्क्षन्ते मोक्षकाङ्क्षिण"इति॥ "आनन्द-मचलं ब्रह्मस्थानं तत्पारमेश्वरम्। सर्वभूतात्मभूतस्थः परमैश्वर्य-

मास्थितः॥ प्राप्तवानात्मनोधाम यन्मोक्षाख्यमव्ययम्॥ तस्मात्सर्वप्रयत्नेन वर्णाश्रमविधौ स्थितः ॥ समाश्रित्यान्तिमं भावं नरोऽलक्ष्मीं तरेद् ध्रुवमितिच ॥ प्राप्य स्थानं यदपेक्षयोत्तमं नास्तीति च तत्रैव द्वितीयाध्याये दर्शितं, प्राजापत्ये ब्राह्मणानां स्मृतं स्थानंक्रियावताम्। स्थानमैन्द्रं क्षत्रियाणां संग्रामे मृत्युलाभिनाम् । वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तताम्॥ अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसाम् ॥ हैरण्यगर्भं तत्स्थानं यस्मान्नावर्त्तते पुनः। योगिनां चामृतं स्थानं व्योमाख्यं परमक्षरम् ॥ आनन्दमैश्वरं धाम सा काष्ठा सा परा गतिरिति॥ एवं परमाकाशरूपपारमेश्वरदिव्यस्थानप्रापिण्याः स्तृतीयभावनायाः निर्गुणयोगसंपादनद्वारेण परममुक्तिहेतुत्वं पुराणावसरेऽपि स्पष्टीकृतम् । मया प्रोक्तोहि भवतां योगः प्रागेव निर्गुणः॥ आरुरुक्षस्तु सगुणं पूजयेत्परमेश्वरम्॥ पिनाकिनं त्रिनयनं जटिनं कृत्तिवाससम् ॥ पद्मासनस्थं रुक्माभं चिन्तयेद्वैदिकीश्रुतिः॥ एषयोगः समुद्दिष्टः सबीजोमुनिपुङ्गव, इत्यारभ्य, यथाविधि प्रकुर्वाणः प्राप्नुयादीश्वरं पदमित्यन्तेन, अत्र तृतीया भावना विवक्षितेत्येतदादिष्वमूर्ताह? अत्रापि कथितो योगो विवक्षित इत्येतदाद्यभावनाबीजश्च सबीजकः, ज्ञानं तदुक्तं निर्बीजं पूर्वं हि भवतां मयेत्याद्यभावनयोरपि सगुणनिर्गुणविषयत्वेन द्वैविध्यमुक्त्वा, सगुणयोस्तयोर्विष्णुं रुद्रं विरञ्चिं वा सबीजं भावयेद्बुधः ॥ अथवाऽन्यानदिकान्देवान् तत्परः संयतेन्द्रिय, इति कांश्चन विषया-

नापाततः प्रदर्श्य, पूजयेत्पुरुषं विष्णुं चतुर्मूर्तिपरं हरिम्। अनादिनिधनं देवं वासुदेवं सनातनम्॥ नारायणं जगद्योनिमाकाशं परमं पदम् ॥ तल्लिङ्गधारी नियतस्तद्भक्तस्तत्परायणः॥ एष एव विधिर्ब्राह्मी भावना चेति मे मतिरिति। अत्र वाह्यपूजायां इव आद्यभावनाद्वयस्यापि विषयोक्त्या पूजयेत्पुरुषं विष्णुमित्यादौ चतुर्भुजत्वादिविशिष्टं विष्णुरूपं तन्मूलं परमाकाशरूपं च विवक्षितमित्यवसीयते तदनुसारेण आकाशं परमं पदमित्येतद्द्वितीवभावनाविषयसमर्पकत्वेन प्रत्येकं योजनीयम्। तल्लिङ्गधारीत्यत्र तल्लिङ्गं द्वितीयाध्याये दर्शितम् । आश्रमोवैष्णवो ब्राह्मो हराश्रम इति त्रयः॥ तल्लिङ्गधारी नियतस्तद्भक्तजनवत्सलः॥ ध्याये त्समर्चयेद्देतान् ब्रह्मविद्यापरायणः॥ सर्वेषामेव भक्तानां शंभोर्लिङ्गमनुत्तमम् ॥ सितेन भस्मना कार्यं ललाटे वक्रपुंड्रकम्। यस्तु नारायणं देवं प्रसन्नः परमं पदम्। धारयेत्ससर्वदा शूलं ललाटे गन्धवारिभिः॥ प्रसन्नोयज्जगद्बीजं ब्रह्माणं परमेश्वरम् । तेषां ललाटे तिलकं धारणीयं तु सर्वदेति ॥७॥

आदि शक्त्युपासनायाः नारायणोपासनाया इव विग्रहविषयत्वं तल्लोकप्राप्तिद्वारकत्वापेक्षाया परिशेषाच्छिवधर्मोत्तरादिप्रसिद्धमुमाविग्रहविषयत्वं तल्लोकावाप्तिद्वारकत्वं च दर्शयति–

विद्वांसः शंकरस्य श्रुतिमतिमहि-

तदुपासनावासनाभि, र्लब्धस्वान्त-प्रतिष्ठाःसुदृढमभिदपातं विलोक्या-त्मनैव ॥ गोलोकस्योर्ध्वभागादपि परमपदाद्वैष्णवादूर्ध्वदेशे, भास्वत्कोटिप्रभं यान्त्यपुनरपगमस्थान-मानन्दरूपम् ॥८॥

श्रवणमननद्वैविध्यमङ्गीकारादनियमाशङ्कायां लौकिकप्रमाणेनैव तयोर्नियमतः प्राप्तिमभिप्रेत्य श्रुतिमतिमहितेति विशेषितं श्रवणमननोपासनानामभेदविषयत्वाद्धासनादार्ढ्येन तत्फलस्य साक्षात्कारस्यापि "अभेद विषयं जगत्॥अद्वैतं भावयात्मानं द्रक्ष्यसे परमेश्वरमिति" गोलोकस्योपरिभागे वैष्णवं परमंपदमित्यत्र श्रुतिः ते ते धामान्युश्मसी गमध्यै गावो यत्र भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरेरेवेति॥ अस्या अर्थः ॥ हे विष्णो ते तानि तच्छब्दाद्बहुवचनस्य सुपांसुलुगितिसूत्रेण शेइत्ययमादेशः ते तानि धामानि स्थानानि गमध्यै गन्तुं उश्मसी इच्छामः गमध्यै इति गमेर्धातोस्तुमर्थेसेसेनित्यादि सूत्रेण तुमुन् प्रत्ययार्थे अध्यै प्रत्ययः उश्मसी वशकान्ताविति धातोरुत्तमपुरुषबहुवचने इदंतोमसीति सूत्रेणान्तिमइकारागमः सां-

हितोदीर्घः तान्येव धामानि विशेष्यन्ते यत्र येषु स्थानेषु अपासः अनपायिन्यः पातेरसुन्प्रत्ययेन समासः भूरिशृङ्गाः दीर्घशृङ्गाः गावः नन्दादयोगोमातरः सन्ति अत्राह एतेष्वेव स्थानेषु अहेतिनिपातएवकारार्थः तत् प्रसिद्धं उरुगायस्य उराभिर्महाद्भिर्गीयमानस्य भूरेर्महतोविष्णोस्तव परमं अधस्तनविष्णुलोकापेक्षयोत्कृष्टं पदमवभाति परमशिवलोकस्याधस्ताद्भाति इति न ब्रह्मणः सदनात्तस्य परमं स्थानं प्रकाशत इति ब्रह्मलोकात्परत्वेन श्रुतस्य विष्णुलोकस्य कथं गोलोकान्तर्गतत्वमिति शङ्कनीयं गोलोकस्यापि ब्रह्मलोकात्परत्वात् अतएवानुशासनिके कथं गोलोकस्य ब्रह्मलोकादपि परत्वमिति पृष्टवन्तं युधिष्ठिरं प्रति तत्रकारणं ब्रह्मवरदानं भीष्मेणोक्तम्। येऽर्चयन्ति त्वद्भवा गाः गोलोके यान्तु ते नराः ॥ मल्लोकोपरि वत्स्यन्ति भवत्या रोहिणि प्रजा इति ॥ मल्लोकोपरि तेलोको भविता सुर मे सदा। त्वत्सुतास्त्रिजगद्भूत्यै गावो भूम्यां चरन्त्विहेति, हरिवंशे गोवर्द्धनोद्धरणे गाः सरक्षितवन्तं कृष्णं प्रति शक्रवचनैरपि ब्रह्मलोकादुपरिगोलोकस्तस्योपरिवैष्णवं परमं पदमिति प्रतिपादितम्। स्वर्गादूर्ध्वं ब्रह्मलोको महर्षिगणसेवितः। तस्योपरि गवांलोकः साध्यास्तं पालयन्ति हि॥ त्वं हि सर्वगतः कृष्ण महाराशिगतो महान्॥ उपर्युपरि तत्रापि गतिस्तव तपोमयी॥ यां न विद्मो वयं सर्वे पृच्छन्तोऽपि पितामहम्॥ यां योगनिरता विप्रा भजन्ते ब्रह्मवादिन इति ॥ साध्याः, यत्र पूर्वेसाध्याः सन्तिदेवा इति पुरुषसूक्तोक्ता देवाः उपर्युपरि गवां स-

मीपएव उपरिभागे शिवधर्मोक्तशास्त्रे पञ्चमाध्याये ब्रह्मलोकात्परं विष्णुलोकं प्रकृत्य, ज्ञेयं विष्णुपदादूर्ध्वं दिव्यं शिवपुरं महत्। भोगसंस्थानमतुलं कर्मयोगरतात्मनाम् ॥ अप्रमेयगुणैर्दिव्यैर्विमानैः सर्वकामिकैः ॥ असंख्यैस्तत्परं व्याप्तं सर्वप्राण्युपकारकैः ॥ सहस्रभूमिविस्तीर्णैः सूर्यकोटिसमप्रभैः । रुद्रलोक इति प्रोक्तमशेषगुणसंयुतम् । सर्वेषां शिवभक्तानां तत्परं परिकीर्त्तितम् ॥ रुद्रक्षेत्रमृतानां च जङ्गमस्थावरात्मना, मित्यादिवचनैरुपरि शिवलोकं वर्णयित्वा, इत्येतदपरं प्रोक्तं श्रीमच्छिवपुरं महत् ॥ देहिनां कर्मनिष्ठानां पुनरावर्त्तनंमतमिति तत्प्रसङ्गंसमाप्य, ऊर्ध्वं शिवपुराज्ज्ञेयं स्थानत्रयमनुत्तमम् ॥ नित्यं परमशुद्धं च स्कंदोमाशंकरात्मकमित्युक्त्वा पुनर्द्वादशाध्याये विष्णुलोकाच्च परमं श्रीमच्छिवपुरं वर्णयित्वा तत्र सर्वतोभद्रमणिमण्डपे शिवस्योपस्थानमुक्त्वा, ईश्वरायतनस्याग्रे श्रीमान् धर्मवृषः स्थितः ॥ यत्र वीरवृषस्तत्रः नित्यं गोमातरः स्थिताः ॥ गोलोकः शिवलोकश्च एकएव ततः स्मृतः ॥ ये गुणा रुद्रलोकस्य गोलोकस्यापि ते गुणाः ॥ इत्यपराशिवपुराणान्तर्गतं गोलोकमभिधाय, शिवलोकाद्बहिर्ज्ञेयमण्डस्यावरणाष्टकम् ॥ अण्डादूर्ध्वं पुनर्ज्ञेयं प्रकृतेर्मध्यतः स्थितम् ॥ ब्रह्मणः परमं स्थानं पद्मरागसमप्रभम् ॥ ब्रह्मलोकात्परं ज्ञेयं विष्णोः स्थानं सनातनम् ॥ इन्द्रनीलप्रतीकाशं महाभोगैरलंकृतम् ॥ विष्णुलोकात्परं स्थानं कुमारस्य महात्मनः ॥ स्वच्छमौक्तिकसंकाशं वरभोगसमन्वितम् ॥ स्कंदस्थानात्परं स्थानमुमादेव्याः प्रकीर्त्तितम् ।

तप्तचामीकरप्रख्यमशेषिगुणसंयुतम् ॥ उमास्थानाच्च परतः स्थानमाद्यमुमापतेः॥ दिनकृत्कोटिसंकाशं सर्वकामसमन्वितमिति ब्रह्माण्डादूर्ध्वं स्कंदोमाशंकरलोकब्रह्मविष्णुलोकाव-प्युक्तौ। स्कान्दे तु काशीखण्डे उमालोकात्परोऽपि गोलोको दर्शितः। शिवलोकाच्च गोलोकादुमालोकाच्च सर्वतः ॥ कुमारलोकाद्वैकुण्ठात्सप्तलोकात्समं ततः ॥ तपोजनमहश्च-श्च सर्वे स्वर्लोकवासिनः ॥ भुवर्लोकाच्च भूलोकान्नागलोका-त्तथाऽखिलान् ॥ स्नातुं माघे समायान्ति प्रयागमरुणोदय इति, अयमेव गोलोकोऽत्र विवक्षितः, इत्थं श्रीकण्ठशिवाचार्य-विरचितब्रह्ममीमांसाभाष्याभिमतरहस्यार्थजातं संक्षिप्तम्। अत्र मूलानि भाष्यवचनान्युदाहरिष्यामः तत्र ब्रह्मज्ञानरूपायाः शक्तेः सकलधर्मगुणरूपत्वं सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे दर्शितम्। सकलचिदचित्प्रपञ्चमहाविभूतिरूपा महासच्चिदा-नन्दसत्तादेशकालादिपरिच्छेदशून्या स्वभाविकी परा शक्तिः परब्रह्मणः शिवस्य स्वरूपं गुणगणश्च भवति न व्यतिरेकेण ब्रह्मणः सर्वज्ञत्वसर्वशक्तिमत्वसर्वकारणत्वसर्वनियन्तृत्वसर्वो-पास्यत्वसर्वानुग्राहकत्वसर्वपुरुषार्थहेतुत्वादिकं सर्वगतत्वं च न सम्भवति किंच महेश्वरत्वं शिवमहादेवरुद्रादिपरमाख्या-भिधेयत्वं च न संभवतीति तस्याः सकलजगदाधारपरमाका-शरूपत्वं जन्मादिसूत्रे आकाशशरीरं ब्रह्मेति श्रुतिव्याख्यायां दर्शितम् । आकाशत इत्याकाशः प्रकाशश्चिदंबरमुच्यते, न भूताकाशः विशेषाभावात् निखिलजगदण्डखण्डबुद्बुदकदम्ब

जलधिस्थानीया परमप्रकृतिरूपा परमशक्तिर्हि चिदंबरमुच्यते तत्स्वरूपं ब्रह्म आकाशशरीरं परमप्रकृतित्वं चिदाकाशस्य सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह वै नामरूपयोर्निर्वहिताते यदन्तरेत्यादिश्रुतिसिद्धामितिदहराधिकरणेऽपि अथ्ययमात्मा स सेतुरेषां लोकानामसंभेदायेतिश्रुतजगदाधारभावदहराकाशरूपत्वमस्याः प्रदर्शितं न दहराकाशमध्यवर्त्तिपरमेश्वर उपास्यः किन्तु दहराकाशे परमेश्वरधर्माणामपहतपाप्मत्वादीनां संबन्धप्रतीतेर्दहराकाशमध्यस्य चिदंबररूपतयेति न विरोध इति तस्याः परब्रह्मपरमानन्दरूपत्वमानन्दमयाधिकरणे दर्शितं परमाकाशरूपं प्रकृत्य आत्मा आनन्दमय इति श्रूयते ? नांविश्वाधिकां निमित्तं परंब्रह्म यत्सत्यं ज्ञानमनन्तं ब्रह्मत्युच्यते तस्माद्वारा तस्मादात्मन आकाशः संभूत इत्याकाशादिप्रपञ्चप्रकृतित्वेन श्रुत आनन्दमयः परमाकाशः परमाकाशरूपत्वमस्य यदेष आकाश आनन्दो न स्यादित्यतोऽवगम्यते। पुनरेष एवानन्दो ब्रह्मेति व्यजानादानन्दाद्ध्येव खल्विमानि भूतानि जायन्ते इत्यादिना सकलभूतप्रकृतित्वेनाभिधीयते तत्रानन्दोब्रह्मेत्यानन्दस्य ब्रह्मत्वे व्यपदेशस्तु ब्रह्मधर्मत्वेन तदभेदात् सैषा भार्गवी विद्या परमेव्योमन्प्रतिष्ठितेति ब्रह्मधर्मस्वरूपे परमानन्दरूपे प्रपञ्चप्रकृतौ परमशक्तिपर्यायिचिदात्मनि वारुणी विद्या च समाप्तेत्युच्यते ततो ब्रह्मधर्मस्वभावः प्रकृत्यात्मा-

परमाकाशरूपा परमशक्तिरानन्दमय इत्युच्यते तद्धर्मित्वेन प्रतिष्ठेत्युच्यते परंब्रह्मेति इदमेव मतमाचार्याणामभिमतम् नत्वानन्दमयं परं ब्रह्मेति मतमिति शिवादित्यमणिदीपिकायां च निपुणतरमुपपादितमस्माभिः॥ जगत्सत्तास्फूर्त्यो-र्ब्रह्मचिच्छक्त्यंशरूपत्वमारम्भणाधिकरणे व्यतिरेकमुखेन दर्शितम्। सच्चिद्रूपेण शिवेन यदि न व्याप्तं जगत्तदा सत्ता-स्फूर्त्तिभ्यां चिताकृतं कथमस्मिंस्फुरतीति च दृश्यते अतो मृद्घटादिकमिव कारणेन शिवेन कार्यमिदं व्याप्तमित्यत्र यद्यपि धर्मिणः शिवस्यैव जगत्सत्ता स्फूर्त्तिरूपत्वमुक्तमिति भाति तथापि धर्मद्वारकमेव तस्य तत्तद्विवक्षितमिति नेतव्यं मृद्घटादिकमिवेति परिणामिदृष्टान्तानुगुण्यात् तदव्यक्तमाह हीतिसूत्रभाष्ये प्रत्यक्षादिना सिद्धा सत्ता ब्रह्मेत्युक्तत्वाच्च तस्याः सकलजगदानन्दरूपत्वं अभावं बादरिरित्यधिकरणे परप्रकृतिरूपा परमसत्ता प्रकाशानन्द-समरसा परमशक्तिर्हि परब्रह्मणः स्वरूपभूतपरमाकाशमु-च्यते इति तां प्रकृत्य प्रदर्शितं कोह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यादेवं ह्येवानन्दयति रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीति सर्वानुभवविषय-त्वमस्य श्रूयते तया च स एको मानुष आनन्द इत्यारभ्य सएको ब्रह्मणा आनन्द इति ब्रह्मपर्यन्तमुपाधिनिरोधना-दानन्दाविर्भावस्तारतम्येन श्रूयते इति तथा आकाशोपास्ते श्चिच्छक्तिविषयत्वमाकाशस्तल्लिङ्गादित्यधिकरणे अक्षा-

शपदेन भूताकाशइति पूर्वपक्षनिराकरणं कृत्वा भूतग्रहणप्रयोजनप्रश्नोत्तराभ्यामाविष्कृतम् । भूताकाश इत्युपपदग्रहणेन किमिति चेत् परमाकाशस्य परमप्रकृतिरूपस्य सर्वभूतकारणत्वसम्भवात्प्रयोजनं तर्हि परमेश्वर इति कथं निर्णयः तदभेदादिति सिद्धमिति जन्मादिसूत्रे एतदधिकरणविषय वाक्यस्यार्थो ऽर्थान्तरत्वादित्यधिकरणविषयवाक्यस्य चिच्छक्तिविषयत्वेन लिखितत्वादयमर्थः स्पष्टः ॥ एवं सर्वत्र ब्रह्मलिंगब्रह्मवाग्निर्देशाकाशपदयुक्तवाक्यानां विविक्तविषषयत्वोक्त्या गायत्री वा इदं सर्वं भूतमित्यादिना निरूपितायाः गायत्र्युपासनाया अपि तद्विषयत्वं सूचितं तत्रापि हि तद्वैतद्ब्रह्मेति इदं वा तद्योयंवहिर्वापुरुषादाकाश इति प्रकृतगायत्रीपरामर्शितच्छन्दसामानाधिरणतद्विषयस्य ब्रह्म शब्दस्याकाशशब्देन सामानाधिकरण्यात् अतएव प्राण इत्यधिकरणमपि निर्णीता प्राणोपासनापि तद्विषया तत्रापि सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसाम्विशन्ति प्राणमभ्युज्जिहत इति सर्वभूतोत्पत्तिलयकारणत्वलिङ्गसद्भावेन सर्वलोकगत्याकाशाविशेषात् आकाशस्तल्लिङ्गादतएव प्राण इति सूत्रयोन्यायसाम्येन समानविषयत्वं सूचयितुं भाष्ये युगपल्लिखितत्वाच्च॥सत्यात्मप्राणा इमं मन आनन्दमिति श्रुतौ प्राणशब्दस्य प्राणः सकलाधारभूतं चिदंवरमुच्यते स्वरूपभूतायां तस्यामेवारामो यस्य तत् प्राणराममिति जन्मादिसूत्रे चिच्छक्तिपरतया व्याख्यातत्वाच्च तथा

धर्मिणः सकलजगत्सर्गरक्षासंहरणनिरोधानुग्रहरूपपञ्चकृत्य-
कारित्वं जन्मादिसूत्रे यत्सर्वज्ञत्वादिविशिष्टमस्पष्टाभिधाना-
धिकरणं शिवतत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते इत्या-
दि [illegible] प्रपञ्चितं चिच्छक्तेः पुरुषप्राप्त्या सकलजगदुपादानत्वं
[illegible] प्रकरणे, मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगदिति, श्रवणान्मायायाः
सकलप्रकृतित्वं तद्विशिष्टत्वेन महेश्वरस्य तदवयवभूतेन चिच्छ-
क्तिशकलभूतेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजग-
द्व्याप्तिश्चावगम्यत इति मायिनः परमेश्वरात् सकलचेतनाचे-
तनः प्रकृतिपुरुषोऽभिव्यक्तो भवति तत्तद्रूपादीश्वराद-
व्यक्तचतुर्मुखाद्युत्पत्तिः तथा च श्रुतिरीश्वरस्य पुरुषरूप-
त्वमभिधत्ते पुरुषो वै रुद्र इति च प्रदर्शितं अत्र श्रुतिगतेनेति
पदमंशभूतेनेत्यनेन व्याख्यातं तदपि महेश्वरांशत्वं न साक्षात्
किन्तु तद्धर्मचिच्छक्त्यंशद्वारकमिति चिच्छक्तिशकलम-
वयवभूतेनेत्यनेन व्याख्यातं अंशेनेति वक्तव्ये शकलेनेत्युक्ति
र्विश्वोत्तरोत्तरोत्तरे विचित्रमनोरथस्य कस्यैकशक्तिशकलः
समाप्तः अध्वानमध्वायतिमध्वविदो वदन्ति तस्मै नमः
सकललोकविलक्षणायेति शिवपुराणवचनस्य च स्वोक्तार्थ-
विषयत्वद्योतनार्थं अव्यक्ताच्चतुर्मुखाद्युत्पत्तिरिति जडाजड-
सकलप्रपञ्चोपादानत्वमुक्तं स्त्रीरूपप्राप्त्या परब्रह्म महिषीत्वं
बहुषु स्थलेषु कृतं सत्यमिति मन्त्रार्थकथने कृष्णपिङ्गलशब्द
परिगृहीततया व्याख्यायते। पुरुषस्य नारायणस्य ब्रह्मकोटित्व

मीक्षतिकर्माधिकरणे प्रपंचाकारमन्तरेण यन्निरतिशयानन्दस्व भावं विष्णोः परमपदरूपं तदेव शिवाभिधेयं परमं ब्रह्मेति विष्णुशिवयोरुपादाननिमित्तयोरवस्थाभेदमन्तरेण स्वरूपे भेदोनास्तीति च प्रदर्शितं सर्वो वैरुद्र इति परमे[illegible]र्वा त्मताभिधानमुपक्रम्य पुरुषस्य नारायणस्य हि स[illegible] मुपादानत्वात् कथमस्य सर्वात्मत्वमित्याशंकायां पुरुषोवैरुद्र इति पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहीति च पुरुषो पि परमेश्वरस्यमहाविभूत्याऽऽत्माजगदाकार इति निरूपित मिति उमायाः परब्रह्मकोटित्वं तत्रैवाधिकरणे कृतं सत्यामिति मन्त्रार्थविवरणे परशक्त्या प्रणववर्णव्यत्यासरूपेणाशब्दवा- च्यायाः शवलाकारत्वेन कृष्णपिङ्गलमित्यनेन दर्शितं अत्र हि परब्रह्मत्वलिङ्गं प्रणववाच्यत्वमुमाया अप्यस्ति तत्र प्रणव मात्राणामुकारस्ततो मकारस्तदनंतरमकार इति व्यत्यस्ताव स्थानमात्रं दर्शितं अयमर्थो लिङ्गपुराणे शिवेनाम्बिकायै वर्णितः " त्वदीयः प्रणवः कश्चिन्मदीयः प्रणवस्तथा ॥ त्वदीयो देवि मन्त्राणां शक्तिभूतो न संशयः ॥ अकारोकारमकारामदीये प्रणवे स्थिताः॥उकारं च मकारं च अकारं च क्रमेण तु॥त्वदीयं विद्धि त्रिमात्रंप्लुतमुत्तममिति वचनवलादकारस्य प्लुतभावः तस्मादौंवीजमुमाशक्तिरित्यादौ प्लुतोच्चारणंकार्यंलोकेतुस्त्री त्वाविवक्षायां गुणपरिणामादितिसूत्रेभाष्ये निर्विकारस्य परि णामासम्भवशङ्कायां यथानिमित्तस्य प्रकृतित्त्वेपि च विकारा दिस्पर्शस्तथा परिणामः सम्भवतीतितत्परिहारं प्रतिज्ञाय

कोयमपूर्वः परिणामः कुतूहलिनो वयं तच्छ्रवणे विचिन्वता मिति पुनः शङ्कामुद्भाव्य शृणु विवेचयाम इत्यादिना साक्षान्नि र्विकारस्य पुरुषावस्थाद्वारकः परिणामइत्युपपादनेन दर्शितं त[illegible]प्रतिषेधादित्यधिकरणेप्युक्तं सर्वज्ञात्सर्वशक्तिमतः [illegible]भेदाद्वाधिकात्प्रथमं परमप्रकृतिः पराशक्तिः प्रादुर्भवति तथात्मन एवसप्रथमं भोक्तृत्त्वदशायां पुरुषइत्युच्यते [illegible]सहस्रशीर्षापुरुषः इति श्रुतौ श्रूयते तदात्मन एव शिवात्स-कलचेतनाचेतनप्रपंचपरिणाम इति जीवानां स्वरूपेण न तद्विकारत्वं किन्तु धर्मज्ञानासंकोचनविकासादिविशिष्टतया, स्वरूपतस्तु केवलतदंशा इत्येतदंशोनानाव्यपदेशादित्यधि-करणे भाष्ये दर्शितं प्रपंचितं नारायणस्य शिवपदप्राप्तिसाधन त्वं पञ्चरात्राधिकरणे पांचरात्राप्राप्तप्रामाण्यसमर्थनानन्तरं शङ्कोत्तराभ्यां दर्शितं ननु पुरुषो वै नारायण इत्यादिश्रुत्या परमे-श्वरएव पुरुषोवासय यदेवस्तज्ज्ञानाराधनादिकमपि क्रमेण परमेश्वरप्राप्तिसाधनमिति श्रूयते तदाराधनप्रतिपादकस्य पांचरात्रस्याप्रामाण्ये तस्यानाराध्यत्वप्रसंग इति चेत् श्रुति विरोधात्पांचरात्रस्याप्रामाण्येपि तस्य का हानिः श्रुतिप्रसिद्ध-मार्गेण तदाराधनसम्भवादिति देवदेवैर्जुष्टत्वमाद्यस्थान स्येतिहि साक्षाद् विषय इत्यादि पुराणवचनोदाहरणेन सूचितं तस्य परब्रह्मशक्तिरूपपरमानन्दमूर्तित्वं विशेषं च दर्शयति सूत्रभाष्ये विष्णोः प्रपञ्चावस्थितस्य परममुत्कृष्टं पदं स्वरूपं परमाकाशरूपं परमानन्दलक्षणं शिवस्य परब्रह्मणः परम्पद-

मेव यत्रासौ निर्हिनात्मा प्रपञ्चाकारोपि न संसरतीति वैष्णवाय परशक्तिविशेषाणां पुंसां समेदत्वमप्रतीकाशङ्कालंवनापि- सूत्रभाष्ये सर्वज्ञ या मनोवाग्विपर्यासहितं स्वशक्तिमरीचिभिः सकलजगत्पूरकं स्वाविभक्तया परप्रकृतिरूपया पर[illegible] चिदेकरूपपरमाकाशलक्षणया स्वावस्था[illegible] यणारब्धहिरण्यगर्भादिसकलकार्यप्रपञ्चया परांक्षनयोम या शवलितरूपं निर्विकारं त्रिलोचनं परं ब्रह्म सर्वोत्तरमिति अत्रस्वशक्तिमरीचयः स्वशक्तेः परमाकाशरूपायाः मरीचयः स्तदंशभूताः वैष्णवादिशक्तिविशेषा विवक्षिताः सर्वत्रप्रसि- द्धोपदेशादित्यधिकरणे शिवस्य सर्वानुग्राहकत्वादिधर्माणां शक्त्यधीनत्वप्रतिपादनात् तस्याः श्रुतिसिद्धं परब्रह्मविद्या प्रदातृत्वं सूचितं वहुप्रदेषु उमासहायं परमेश्वरंप्रभुं त्रिलोचनं नीलकण्ठंप्रशातं, ध्यात्वा मुनिर्गच्छतिभूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ ऋतं सत्यं परब्रह्म पुरुषं कृष्णपिंगलं॥ अंविका पतय उमापतये नमोनमः, इति कैवल्यवाक्यानामुदाहरणा- त्तस्याः शिवेन सहोपासनादिनियमः सूचितः शिवोपासनायाः साक्षाद्दिव्यस्थानप्रदातृत्वं प्रथमसूत्रमारभ्य तत्र तत्र प्रदेशेषु वहुधा प्रदर्शितं तस्याः साक्षात्कारद्वारकत्वं विकल्पोऽवि- शिष्टफलत्वात् आप्रापणात्तत्रापि हि दृष्टमित्याधिकरणयोरुक्तं उपासनासाक्षात्कारयोः शिवजीवाभेदविषयत्वं आत्मेति तूपगच्छन्ति ग्राहयंति चेत्यधिकरणे वर्णितं उमानारायणयोः परंपरया दिव्यस्थानप्राप्तिहेतुत्वं प्रतीकालंवनादिसूत्रभाष्ये

दर्शितं "तेब्रह्मलोकेतु परान्तकालेपरामृतात्परिमुच्यन्तिसर्वे" इति श्रुतेः [illegible] शिवस्य परमविभूतित्वेन ये विष्णुमुपासते तदवस्थानत्वात् ब्रह्मशब्दवाच्यस्य तस्य लोकं प्राप्य प्रा-[illegible] परान्तकाले परंपरा चर्मदेहावसानेपरा-[illegible] भवतीति विष्णूपासकानामर्चिरादीनां विष्णुपदप्राप्तिपू[illegible]विलम्बेन शिवपदप्राप्तिरिति नारायणोपासनायामुक्तमिदं अम्बिकोपासनायामपि तुल्यम् न्यायसाम्यात् ॥ कन्यारूपामुमां शान्तां सूर्यकोटिसमप्रभां, ध्यायमानः सदा भक्त्या दिव्यं स्थानमवाप्नुयादिति शिवधर्मोत्तरे तदुपासनायास्तल्लोकप्राप्तिहेतुत्वस्योक्तत्वाच्च तत्तल्लोकप्राप्तिद्वारकत्वोक्तिः शिवोपासनाद्वारकत्वस्याप्युपलक्षणं, यदाचर्मवदाकाशं वेष्टयिष्यन्तिमानवाः॥तदाशिवमविज्ञाय दुःखस्यान्तोभविष्यतीति मन्त्रस्य भाष्ये बहुषु प्रदेशेषूदाहृतत्वात् दिव्यस्थानस्य विष्णुलोकात्परत्वं सांप्रदायाधिकरणे प्रदर्शितं विष्णु पदसम्बधिनि विरजा नदी प्राकृतप्रपञ्चसीमावधिः तदनुप्रवेशे न प्रसीदप्रक्षीणसर्वकर्मलेपाः योगिनोविष्णुपदादूर्ध्वंप्रमाकृतं शिवपदं परमानन्दमयमनुभवंतस्तत्प्रविशतीति अन्यविष्णुलोके गोलोकान्तर्गतएव विवक्षितः न परशिवलोकान्तर्गतः पराशिवलोकं प्राप्तानां पुनः संसरणाभावस्त्वनावृत्तिः शब्दादित्यधिकरणे, दिनकृत्कोटिसंकाशं स्थानमादिमुमापतेः ॥ सर्वकामसमायुक्तं विशुद्धं नित्यमक्षयं॥ सम्प्राप्य तत्पदं दिव्यं समस्तक्लेशवर्जिताः॥सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा भवन्ति


च॥विशुद्धकार्यकरणाः परैमश्वर्यसंयुताः॥सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः ॥ ये सम्प्राप्ताः परं स्थानं ज्ञानयोगरता नराः॥ न तेषां पुनरावृत्तिर्घोरे संसारमण्डले ।इत्यादिवचनैर्व्यवस्थापित इति सर्वं समंजसम् ॥

आमथ्य भाष्यदुग्धाब्धिमाप्तं रत्नत्रयं
शम्भुर्गौरीहरिश्चेति तच्च सम्यक् परीक्षितम् १

इति श्रीमद्भरद्वाज कुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य्य विश्वजिद्याजि श्रीरङ्गराजाध्वरि (व) सूनोरप्पय्यदीक्षितस्य कृतौ

रत्नत्रयपरीक्षा समाप्ता ।





विज्ञप्तिः ।

विदितमस्तु तत्रभवतां विद्वज्ज ... णां सहृदयसुहृज्जनानाम्। यदियं रत्न ... रावारपारगैः सकलशास्त्रक्षीराब्धिमथ ... रसास्वादैः श्रीमदप्पय्यदीक्षितैः कृता, तथापि न ज्ञाय... केन निरक्षरपुरु..ण व पश्यतोहरेणोद्विग्नमनसा क्षिप्रं लेखनेन दुरुद्धरा दुर्वचा संपादिता, यथा म स्थाने ककारः ककारस्थाने दकारस्तथा भकारस्थाने दकारः, ह्रस्ववर्णे दीर्घवर्ण दीर्घवर्णे ह्रस्ववर्णः, एवं ण्हह्वद्रभ्रादिसंयुक्तवर्णेषु लेखकस्य परिचयएव नासी कुत्रापि पङ्क्तिमध्ये रामरामरामेति लिखितमस्ति, किंच मूलग्रन्थतिलक ग्रन्थयोर्विभागोपि दुरवगम्यः, श्लोकानांच छन्दोभङ्गोवर्तते, मुद्रणागारचै ... यासौ प्रकाशकेन दत्ता—

अनन्यगतिना मया तस्यामेव शोधने बहुतरं प्रयत्नः कृतः परंच यथायोग्य संतोषो न समासादितः, वर्तत एव यत्रकुत्रापि छिद्रम्। क्षमापयति त भवद्भ्यो महद्भ्यः—

शोधकः ।



